आचार्य-वामन-प्रोक्तम्

वामनीयं लिङ्गानुशासनम्

स्वोपज्ञवृत्तिसहितम्

॥ ओ३म् ॥

वामनीयं लिङ्गानुशासनम्

स्वोपज्ञवृत्तिसमेतम्

प्रकाशकः—
रामलाल कपूर ट्रस्ट
बहालगढ़ (सोनीपत-हरयाणा)

मुद्रकः—
सुरेन्द्र कुमार कपूर
रामलाल कपूर ट्रस्ट प्रेस, बहालगढ़
(सोनीपत-हरयाणा)

द्वितीयवार ५०० संवत् २०३६ वि० मूल्यम् १.००

वैदिक आर्ष वाङ्मय प्रकाशित करने की बृहत् सामूहिक योजना

प्राचीन ऋषिमुनियों का समस्त ज्ञानविज्ञान उनके द्वारा प्रोक्त प्राचीन ग्रन्थों में ही सुरक्षित है। भारतीय प्राचीन इतिहास और संस्कृति का भी यही वाङ्मय निदर्शक है। इसी के प्रचार के लिये ऋषि दयान्द ने सर्वाधिक बल दिया है। पुराकाल में यह वाङ्मय अत्यन्त विशाल था, परन्तु सम्प्रति **सहिता शाखाएं ब्राह्मण आरण्यक उपनिषद् वेदाङ्ग उपाङ्ग उपवेद** आदि के रूप में केवल सौ सवा सौ ग्रन्थों तक सीमित रह गया है। इनमें से अधिकांश ग्रन्थ छप चुके हैं, परन्तु वे भी प्रायः ३०-४०-५० वर्षों से दुर्लभ हो गये हैं। और बहुत से अभी तक अप्रकाशित पड़े हैं। उन सब को प्रकाशित करने की एक बृहत् योजना भी **रामलाल कपूर ट्रस्ट** (बहालगढ़), **श्री चौ० नारायण सिंह प्रताप सिंह धर्मार्थ ट्रस्ट** (करनाल), और, **श्रीमती सावित्री देवी बागडिया** ट्रस्ट (कलकत्ता) के सहयोग से इसी वर्ष आरम्भ की है।

इस योजना के अन्तर्गत निम्न ग्रन्थों के सम्पादन वा मुद्रण का कार्य हो रहा है—

१. **अथर्व वेद की पैप्पलाद शाखा**, २. **गोपथ ब्राह्मण**

३. वेङ्कटमाधवीय **ऋग्वेदानुक्रमणी** (हिन्दी व्याख्या सहित)

इस वर्ष (सन् १९७९) के अन्त तक संख्या २ तथा ३ के ग्रन्थ छप कर तैयार हो जायेंगे।

मीमांसा शाबर भाष्य-हिन्दी व्याख्या—यह मूल शाबरभाष्य सहित विस्तृत हिन्दी व्याख्या लगभग ८-१० भागों में पूर्ण होगी। **दो भाग छप चुके हैं, तृतीय भाग छप रहा है।**

इन सब पुस्तकों को विशेष **रियायती मूल्य** में प्राप्ति की जानकारी के लिये निम्न पते पर पत्रव्यवहार करें।

वेद-वाणी (मासिक पत्रिका)

३१ वर्षों से विना नागा नियत समय पर प्रकाशित होनेवाली एकमात्र विशिष्ट मासिक पत्रिका। वर्ष के आरम्भ में एक बड़ा विशेषाङ्क प्रकाशित होता है। मूल्य १०रु० वार्षिक, विदेश के लिये २० रु० वार्षिक।

रामलाल कपूर ट्रस्ट, बहालगढ़ (सोनीपत-हरयाणा)

सम्पादकीयम्

(प्रथम-संस्करणम्)

जगति यावन्तः पदार्थाः सन्ति, ते सर्वेऽपि संस्त्यानप्रसवगुणयोगाद् उभयोः साम्याद् अभावाद्वा स्त्रीपुन्नपुंसकरूपेण विभक्ता उपलभ्यन्ते। तथा चोक्तं भगवता भाष्यकारेण—

सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः शब्दस्पर्शरूपरसगन्धवत्यः। महा० ४।१।३॥

तत्र संस्त्यानप्रधाना स्त्री, प्रसवगुणप्रधानः पुमान्, उभयोः साम्येऽभावे वा नपुंसकः। इत्येवं स्त्रीपुन्नपुंसकानां विभागो ज्ञेयः। तदुक्तम्—

संस्त्याने स्त्यायतेर्ड्ट् सूतेः सप् प्रसवे पुमान् इति। महा० ४।१।३॥

संस्त्यानविवक्षायां स्त्री, प्रसवविवक्षायां पुमान् उभयोरविवक्षायां नपुंसकम् इति च। महा० ४।१।३॥

यथा जगति प्रतिपदार्थं स्त्रीपुन्नपुंसकभेदा उपलभ्यन्ते, एव तद्वाचकशब्देष्वपि स्त्रीपुन्नपुंसकविभागा विद्यन्ते। तत्र प्राणिजगति लिङ्गज्ञानव्यवस्था सुकरा वर्त्तते[1]। परन्तु अप्राणिजगति साऽत्यन्तं दुरूहा, यतो हि जडपदार्थेषु स्त्रीपुन्नपुंसकलिङ्गज्ञानं सुदुष्करम्[2]। तस्मात्तन्निमित्तकं तत्तच्छब्दानामपि विशिष्टलिङ्गविज्ञानमत्यन्तक्लेशसाध्यं वर्तते।

एकमन्यदप्यस्ति कारणं, येन संस्कृतभाषायाः पदानां लिङ्गज्ञानं दुःखसाध्यमभूत्। अतिपुराकाले यदा मनुष्याणां सुसूक्ष्मभेदप्रभेदग्रहणसमर्था बुद्धय आसन्, तदा जडपदार्थेष्वपि चेतनपदार्थ इव वास्तविकं लिङ्गं विज्ञाय तच्छब्देऽपि यथार्थं लिङ्गं व्यवहरन्ति स्म। अत एव तस्मिन् समये प्रायेण सर्वेऽपि शब्दास्त्रिलिङ्गा आसन्। एतच्च प्राचीनेषु वैदिकग्रन्थेषु तथाविधलिङ्गप्रयोगदर्शनात्,

---

१. तत्र स्त्रीधर्मोपेतस्य द्रव्यस्य शब्दोऽपि स्त्रीलिङ्गः, पुंधर्मोपेतस्य पुँल्लिङ्ग इति स्पष्टं विज्ञातुं शक्यते। उभयोर्धर्मयोरविज्ञाने नपुंसकत्वं प्रयुज्यते। यथा—किं तस्या जातम् इति। गुर्जरभाषायामद्यापि दूरादिहेतोः स्त्रीपुंस्त्वाविज्ञाने नपुंसकत्वं प्रयुज्यते। यथा—स्त्रीलिङ्गे 'कुतरी', पुँल्लिङ्गे 'कुतरो', उभयभेदानवग्रहे नपुंसके 'कुतरू' इति। एवमन्यत्रापि।

२. सर्वे जडपदार्था अपि स्त्रीत्वादिधर्मविशिष्टा वर्तन्ते। तस्य परिज्ञानं रत्नपरीक्षालक्षणग्रन्थेषु त्रैविध्यविधानात्, सामान्यतो दृष्टानुमानेन शक्यते कर्तुम्। वृक्षादीनामपि त्रैविध्यं लक्ष्यत एव लोके।

केषांचिच्चाद्यापि त्रिलिङ्गत्वदर्शनाच्चानुमीयते। उत्तरकालं संस्कृतभाषाया ह्रासात्[1] तस्याः प्राचीना लिङ्गव्यवस्थाऽपि प्रायेण नष्टा। तत्र केषाञ्चित् स्त्रीलिङ्ग एव प्रयोगोऽवशिष्टः, केषांचित् पुंल्लिङ्ग एव, केषाञ्चिच्च नपुंसकलिङ्ग एव। तत्र ये द्विलिङ्गास्त्रिलिङ्गा वा तेषां संख्या त्वतिस्वल्पा वर्तते। एवं यथार्थलिङ्गविज्ञानस्य व्याकुली भूतत्वाद् तद्विज्ञानं विदुषां कृतेऽपि दुष्करमभूत्, सामान्यजनानां तु का कथा?

सत्येवं परमकारुणिकैर्ऋषिभिराचायवर्यैश्च साधारणजनेभ्योऽपि लिङ्ज्ञानं सुखसाध्यं स्यादिति विचिन्त्य लिङ्गानुशासनग्रन्थानां प्रवचनमकारि। तत्र कैः कैर्महानुभावैर्लिङ्गानुशासनानां प्रवचनं विहितमिति न साकल्येन विज्ञातुं शक्यम्, तादृशां कृत्स्नानां ग्रन्थानां सम्प्रत्यनुपलम्भात्। तथापि स्त्रीत्वादिलिङ्गानां शब्दैः सह समवायिसंबन्धदर्शनात् लिङ्गानुशासनमन्तरा न शब्दानुशासनानां कार्त्स्न्येन प्रवक्तुं शक्यत्वात् सर्वैरपि शब्दानुशासनप्रवक्तृभिर्लिङ्गानुशासनानां प्रवचनमवश्यमकारीति सामान्येन शक्यते वक्तुम्। तदतिरिक्तैरपि कैश्चिद् विपश्चिद्भिः स्वातन्त्र्येणापि लिङ्गानामनुशासनं विहितिम्। तदेवं द्विविधानि लिङ्गानुशासनानि सम्प्रत्युपलभ्यन्ते, कानिचित् शब्दानुशासनस्य खिलभूतानि, यथा पाणिनीयं लिङ्गानुशासनम्; कानिचित् स्वातन्त्र्येण प्रोक्तानि, यथा हर्षीयं वामनीयं वा लिङ्गानुशासनम्। तदेवमुभयविधानि यानि लिङ्गानुशासनानि सम्प्रति ग्रन्थरूपेणोपलभ्यन्ते, नाम्ना वा प्राचीने वाङ्मये स्मर्यन्ते, तानीमानि—

१. शान्तनवम्।
२. व्याडीयम्।
३. पाणिनीयम्।
४. चान्द्रम्।
५. वाररुचम्।
६. अमरसिंहीयम्।
७. जैनेन्द्रम् (देवनन्दिकृतम्)।
८. शाङ्करम्।
९. हर्षवर्धनीयम्।
१०. दौर्गम्।
११. वामनीयम्।
१२. शाकटायनीयम् (पाल्यकीर्ति-प्रोक्तम्)
१३. भोजीयम्।
१४. बुद्धिसागरसूरि-प्रोक्तम्।
१५. अरुणदेवीयम्।
१६. हैमम्।
१७. हेलाराजीयम्।
१८. मलयगिरि-कृतम्।
१९. रामसूरि-प्रोक्तम्।
२०. वेङ्कटराजीयम्।

---

१. एतद्विषये 'संस्कृत व्याकरणशास्त्र का इतिहास' नाम्नि ग्रन्थे विस्तरेण प्रतिपादितम्। द्रष्टव्यस्तस्य प्रथमोऽध्यायः।

२१. लिङ्गकारिका ।	३१. आनन्दकवि-कृतम् ।
२२. लिङ्गनिर्णयः ।	३२. विद्यानिधि-कृतम् ।
२३. नवकिशोर-कृतम् ।	३३. रामनाथीयम् ।
२४. व्यासीयम् ।	३४. विद्यावाचस्पति-कृतम् ।
२५. जैमिनिकोश-सूत्रम् ।	३५. शाश्वतोद्धृतम् ।
२६. कात्यायनीयम् ।	३६. जयानन्दसूरि-कृतम् ।
२७. वात्स्यायनीयम् ।	३७. नन्दि-कृतम् ।
२८. दण्डि-कृतम ।	३८. सरयूप्रसाद-कृतम् ।
२९. पद्मनाभीयम् ।	३९. लिङ्गवचनविचारः ।
३०. जयसिंहीयम् ।	४०. लिङ्गप्रबोधः ।

एषु चत्वारिंशल्लिङ्गानुशासनेषु आद्यानां त्रयोविंशतीनां लिङ्गानुशासनानामितिवृत्तं 'संस्कृत व्याकरण शास्त्र का इतिहास'नाम्नि ग्रन्थे[1] विस्तरेण प्रतिपादितमिति तत्तत एव द्रष्टव्यम् । अवशिष्टेषु चतुर्दशग्रन्थानामुल्लेखः पण्डित-रामअवध-पाण्डेयमहानुभावेन 'संस्कृत में लिङ्गानुशासन साहित्य'-नाम्नि लेखे[2] विहितः । यद्यपि पाण्डेयमहोदयस्य कृतस्ना ग्रन्थसंख्या ४१ एकचत्वारिंशद् वर्तते,तथापि तत्र केषांचित् पर्यायनाम्ना द्विरुक्त्या,केषांचित् टीकाग्रन्थानां च निर्देशाद् तेषां वास्तविकी संख्या षट्त्रिंशदेव सम्पद्यते ।

विस्तरभिया पौनरुक्त्यदोषाच्च नैतेषां ग्रन्थानामिहेतिवृत्तं निबद्धयते ।

वामनस्य कालः

संस्कृतवाङ्मये वामननामानो बहवो विद्वांसः प्रसिद्धिं गताः । तत्र काशिकावृत्तिकृत्, काव्यालङ्कारसूत्रकृत्, लिङ्गानुशासनकृत्, विश्रान्तविद्याधरव्याकरणप्रवक्ता च प्रसिद्धतमाः । एषु लिङ्गानुशासनकृद विश्रान्तविद्याधरव्याकरणप्रवक्ता न भवितुमर्हति, लिङ्गानुशासने पाणिनीयसूत्रोद्धरणदर्शनात् । काशिकाकृदपि न संभवति,तस्य प्राचीनतरत्वात् । अवशिष्टः काव्यालङ्कारसूत्रकृत् । तस्य लिङ्गानुशासनकृतैक्यमनैक्यं वेत्यत्र संशेरते ऐतिह्यविदः । वयं तूभयोः स्वग्रन्थयोः स्वोपज्ञवृत्तिलेखनाद्,उभयोर्ग्रन्थयोर्यथास्थानं पाणिनीयसूत्रोद्धरणाद्,उभयोश्च वृत्त्योर्विक्रमस्याष्टमशताब्द्या उत्तरकालिकस्य ग्रन्थस्य ग्रन्थकर्तुर्वाऽस्मरणाद् ऐक्यमनुमिनुमः ।

---

१. भाग २, पृष्ठ २५४—२७६, संवत् २०३० संस्करण ।

२. सम्मेलन पत्रिका (प्रयाग), वर्ष ४६ संख्या ३, पृष्ठ ६०—६८ ।

वामनो जयापीडस्य कश्मीराधिपतेः सभ्यो मन्त्री चासीत् । एतच्च राजतरङ्गिण्यां कल्हणः स्पष्टं निरदिशत्—

मनोरथः शङ्खदत्तश्चटकस्सन्धिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ।।४।४९७।।

जयापीडस्य च राज्यकालः वि० सं० ८५६—८७६ पर्यन्तमभूत् ।

वामनः षष्ठ्या आर्यायाः स्वोपज्ञे व्याख्याने **जगत्तुङ्गसभापदं** निर्दिशति ।[1] अत्र कश्मीराधिपतेर्जयापीडस्यैव संकेत इति केचनैतिह्यविदः प्रतिजानते । यद्येतत् सत्यं स्यात्तर्हि काव्यालङ्कारलिङ्गानुशासनयोरेक एव कर्त्ता इति निश्चितं वक्तुं शक्यते । तथा सति वामनस्यास्य देशकालावपि निश्चितौ भवेताम् ।

पण्डितवेङ्कटरामशर्मणो भ्रान्तिः—विभिन्नासु लिङ्गानुशासनवृत्तिषु धर्मशब्दस्य नपुंसकत्वद्योतनाय **तानि धर्माणि प्रथमान्यासन्** (ऋ० १०।९०। १६) इत्यृक्चरणं प्रमाणत्वेनोद्ध्रियते[2] । वचनमिदमधिकृत्य हर्षवर्धनीयलिङ्गानुशासनस्य सम्पादकेन वेङ्कटरामशर्मणा प्रत्यपादि—

परन्तु लौकिकसंस्कृतभाषायाः पदानां लिङ्गान् अनुशासितुमारब्धस्य ग्रन्थस्य व्याख्यानाय प्रवृत्त एकत्र धर्मस्य नपुंसकतां दर्शयितुं 'तानि धर्माणि प्रथमान्यासन्' इति लौकिकसंस्कृतातिगं वाक्यमुदाजहार इतीदं मन्यामहे व्याख्याकारस्यैकमतिसाहसमिति । भूमिका, पृष्ठ ४० ।

मन्ये हर्षीयलिङ्गानुशासनसम्पादकेन वेङ्कटरामशर्मणा वैयाकरणपन्था न सम्यगवगाहितः । अत एव स हर्षीयलिङ्गानुशासनव्याख्याकर्तुरसाहसमप्यतिसाहसमवबुद्धवान् । तत्र तस्य महानुभावस्य द्वे भ्रान्ती । प्रथमा तावत् सामान्यसंस्कृतभाषाया लिङ्गानुशासयितुं प्रवृत्तानाम् आचार्याणां कृते लौकिकसंस्कृतभाषाया लिङ्गानुशासनकर्तृत्वारोपरूपा । सर्वेषामप्याधुनिकलिङ्गानुशासनानामाधारभूत पाणिनीयं लिङ्गानुशासनम् । तच्चोभयविधसंस्कृतभाषायाःशब्दानुशासनस्य खिलरूपत्वादुभयविधसंस्कृतभाषाया एव लिङ्गान्यनुशास्ति । अत एव तमनुसृत्य विहितानि लिङ्गानुशासनान्यपि

---

१. पृष्ठ ९ पङ्क्ति १ (एतत्संस्क०) ।

२. हर्षीय लिङ्गानुशासन पृष्ठ ३४, शाकटायनीय लिङ्गा०, वामनीय लिङ्गानु० पृष्ठ ११ (अस्मदीयं सं०) ।

उभयविधसंस्कृतभाषायाः, न केवलं लौकिकसंस्कृतभाषाया इति विस्पष्टम्। अतो तद्व्याख्यातॄणां क्वचित् वैदिकप्रमाणनिर्देशो न कथमपि दोषावह इति। अपरा भ्रान्तिर्वैदिकप्रयोगाणां शब्दप्रयोगविषये प्रामाण्यस्वीकाराभावरूपा। महाभाष्यकारपतञ्जलिसदृशाः प्रमाणभूता आचार्याः शब्दप्रयोगविषये प्रामाण्यनिदर्शनाय बहुत्र वैदिकानि वचनान्युदाजह्रुः। तद्यथा—

उभय खल्वपि दृश्यते। विरूपाणामप्येकेनानेकस्याभिधानं भवति। तद्यथा— द्यावा ह क्षामा (ऋ० १०।१२।१), द्यावा चिदस्मै पृथिवी नमेते (ऋ० २।१ ।१३) इति। महा० १।२।६४, पृष्ठ २४२, कीलहार्न सं०।

उभयं खल्वपि दृश्यते—स्वस्ति सोमसखा पुनरेहि, गवां सख इति। महा० २।१।२४, पृ० ३८४, कील० स०।

निरुक्तसमुच्चयकारो वररुचिरप्याह—

योनिशब्दोऽयमुभयलिङ्गः। तथाहि लिङ्गानुशासनकारः पठति— 'श्रोणियोन्यूर्मयः पुंसि च' इति, 'समुद्रं वः प्रहिणोमि स्वां योनिम्' (शां० श्रौ० ४।११।६)**इति च प्रयोगदर्शनात्।** पृष्ठ १६। अस्मदीयं संस्करणम्।

एतेन धर्मशब्दस्य नपुंसकलिङ्गताबोधनाय वैदिकवचनमुदाहरन्तो व्याख्याकारा निरवद्या एवेति विस्पष्टम्।

एतल्लिङ्गानुशासनस्योद्धर्तारः

वामनीयमिदं लिङ्गानुशासनम् अमरकोशस्य व्याख्याकारैः सर्वानन्दक्षीरस्वामिरायमुकुटप्रभृतिभिः स्वव्याख्यासु बहुधोद्धृतम्, आचार्यहेमचन्द्रेणापि स्वीयलिङ्गानुशासनविवरणे स्मृतम्।

एतेनास्य लिङ्गानुशासनस्य प्रामाण्यं सर्वथा विस्पष्टम् भवति।

एतत्संस्करणस्य वैशिष्ट्यम्

अस्मिन् संस्करणेऽस्माभिः बडौदानगरतः प्रकाशितात् पूर्वसस्करणाद् यद्यद् वैशिष्ट्यं सम्पादितं तदित्थम्—

१. अनेके पूर्वमुद्रिता अपपाठा इह शोधिताः। यथा—

(क) द्रष्टव्या चतुर्थपृष्ठस्था प्रथमा टिप्पणी।

(ख) पृष्ठ ८, पं० २, इत्यत्र 'द्विगुरुपि' इत्यस्य 'द्विगुरपि' शोधनम्।

(ग) पृ० ११, पं० ४, इत्यत्र 'रक्षः' इत्यस्य 'रक्षणः'।

(घ) पृ० ११, पं० १६, इत्यत्र 'पृथ्व्यादिभ्यः' इत्यस्य 'पृथ्वादिभ्यः' शोधनम्।

(ङ) पृ० ११, पं० २२ इत्यत्र 'धर्मसाधने योगदौ' इत्यस्य 'धर्मसाधने यागादौ' शोधनम् ।

एवमेतस्मिन् प्रथमसंस्करणे पूर्वमुद्रणस्थाः पञ्चदशाशुद्धयः संशोधिताः।

२. कतिपयानिर्ज्ञातमूलोद्धरणानामाकरग्रन्थोल्लेखोऽपि विहितः । यथा—

(क) द्रष्टव्या चतुर्थपृष्ठस्था प्रथमा टिप्पणी—'श्वेतो धावति' इत्यस्य ।

(ख) द्रष्टव्या द्वादशपृष्ठस्था टिप्पणी ।

(ग) द्रष्टव्या पञ्चदशपृष्टस्था टिप्पणी ।

(घ) द्रष्टव्या एकविंशपृष्ठस्था तृतीया टिप्पणी ।

३. बहुत्र तुलनात्मिकाष्टिप्पण्योऽपि निर्दिष्टाः । यथा पृ० ६, १६, १८॥

४. मूलकारिकाणां वर्णानुक्रमसूची निर्दिष्टा ।

५. येषां पदानां लिङ्गानि बोधयितुं साक्षात् कारिकायां तद्व्याख्यायां वा निर्देशो विहितः, तेषां वर्णानुक्रमसूची परिशिष्टे प्रदत्ता ।

मन्ये एतावद् वैशिष्टयेन संस्करणमिदं बडौदानगरतः प्रकाशित-पूर्वसंस्करणापेक्षयाधिकं विदुषां मनस्तोषाय भविता, बालानां च सौख्याय ।

उपसंहारः

भारतीय-प्राच्यविद्या-प्रतिष्ठानस्य संस्थापकानां पण्डितयुधिष्ठिरमीमांसकानां निदेशमनुसरता तेषां च साहाय्येन ग्रन्थोऽयं मया सम्पादितः । प्रथमोऽयमस्मिन् कर्मणि मे प्रयास इति कृत्वाऽत्रत्यान् मदीयान् दोषान् क्षंस्यन्ते तत्रभवन्तो विद्वद्वर्याः, सदाशिषा च वर्धयिष्यन्ति म उत्साहमिति भूयोभूयः प्रार्थये ।

भारतीय-प्राच्यविद्या-प्रतिष्ठान
३१।१४४ अलवर गेट, अजमेर

विदुषां वशंवदा—
वेदवती व्याकरणोपाध्याया

द्वितीयं संस्करणम्

चिरकालात् समाप्तं वामनीयं लिङ्गानुशासनं पुनः संशोध्य प्रकाश्यते ।

रामलाल कपूर ट्रस्ट
बहालगढ़ (सोनीपत)

विदुषां वशंवदः—
युधिष्ठिर-मीमांसकः

वामनीयं लिङ्गानुशासनम्

स्वोपज्ञवृत्तिसमेतम्

ओ३म्

वामनीयं लिङ्गानुशासनम्

स्वोपज्ञवृत्तिसमेतम्

श्रेयांसं शिवमीश्वरं प्रशमिताशेषात्मदोषाशयं
विश्वक्लेशविनाशिनं शुभनिधिं नत्वा गुरुं च त्रिधा ।
यद्व्याडिप्रमुखैः प्रपञ्चबहुलं लिङ्गस्य लक्ष्मोदितं
तत्संहृत्य मया यथा निगदितं व्याख्यायते जानताम् ॥

अथ सकलबुधजनाभिमतसाधुशब्दप्रयोगोपयोगि लिङ्गमवश्यमनुशिष्यमतिबहुतरमपि सामान्यविशेषवता लक्षणेनेति कृत्वा तदनुशासनमशेषविघ्नोपशमनाय मङ्गलपूर्वकमभिधीयते—

सिद्धं विबुधजनेष्टं विदिताखिलवाङ्मयं प्रणम्याप्तम् ।
लिङ्गानुशासनमहं वच्म्यार्याभिः समासेन ॥१॥

लिङ्गानुशासनमहं वच्मि ब्रवीमि । श्रेयोऽर्थमविघ्नेन च शास्त्रपरिसमाप्तिनिमित्तमिष्टदेवतां सिद्धं प्रणम्य वच्मि । य उपरतसकलव्यापारो विनिहतजननमरणकारणः स सिद्धः प्रणन्तुमिष्टः प्रणामयोग्यत्वाद्विदिताखिलवाङ्मयमिति विशेषितत्वाद्वा । अत एवाञ्जनसिद्धादिव्युदासाय विशेषणमुपादीयते । किंविशिष्टं सिद्धम्? विबुधजनेष्टमिति—विबुधा हेतु··· इष्टः पूजितो यः सिद्धो देवताविशेषः स तथोक्तस्तम् । प्रणम्येति—पुनरपि प्राप्ताष्टगुणैश्वार्याणिमा··· । विदिताखिलवाङ्मयमिति—विदितं ज्ञातमखिलमशेषं वाङ्मयं वस्तुजातं येन स तथोक्तस्तं प्रणम्य··· । एवमयमिष्टदेवतानमस्कारः सामान्येनोक्तः । साम्प्रतमधिकृतदेवतानमस्कारार्थं प्रतिपादनाय

च विशेषणमुपादीयते—**आप्तमिति** । यो दृष्टेष्टाविरुद्धाविसंवादिवचनोऽत्यन्तसकललोकहितागमप्रणेता विश्वसनीयः स आप्तः । य एवंविधः सिद्धस्तं प्रणम्येति । अनेनाशेषशास्त्रप्रशास्तृत्वमापादितं भवति । तथा चोच्यते लिङ्गानुशासनमाप्तमिति । स्त्रीपुंनपुंसकलिङ्गस्याधिकृतस्यानुशासनो यः स तथोक्तस्तं प्रणम्य । अथवा लिङ्गं चिह्नं लक्षणं सर्वस्यैव तस्यानुशासनं सिद्धं प्रणम्य लिङ्गानुशासनं शास्त्रं वच्मि कथयाम्यहमिति सम्बन्ध आवृत्त्या । "श्वेतो धावति[1]", "कथैव भारती यस्य[2]" इति यथा, तथा लिङ्गानुशासनशब्दः सम्बध्यते । शब्दशास्त्रविवक्षितस्त्रीपुंनपुंसकलिङ्गान्युच्यन्ते, तल्लिङ्गमनुशिष्यते निगद्यते येन तच्छास्त्रं तथोक्तं तदहं वच्मि । तच्च सिद्धमनादिकालव्यवस्थितं साधुशब्दप्रयोगवत् । अथवा सिद्धमसंस्कार्यविसंवादि च तत वच्मि, अन्यत् विबुधजनेष्टं तत् । विशेषेण विविधा वा बुधाः विबुधाः पण्डितास्तेषां जनः समुदायः, तस्य इष्टमभिमतं साधुशब्दप्रयोगोपयोगित्वात् । तच्च विदिताखिलवाङ्मयम् । विविधैः प्रकारैः दितं खण्डितं तत्तनलादिखण्डैः अखिलं वाङ्मयं यस्मिंस्तत्तथोक्तं लिङ्गानुशासनमहं वच्मि । विदितमित्यत्र "यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका भवन्ति[3]" इति द्यतेः "अच उपसर्गात्तः" (७।४।४७) इति त-आदेशो न भवति । प्रणम्यादाप्तं नमस्यादाराध्याद् देवताविशेषादुपलब्धं लिङ्गानुशासनं वच्मीति । पूर्वाचार्यैर्व्याडिप्रमुखैर्लिङ्गानुशासनं सूत्रैरुक्तं, ग्रन्थविस्तरेण च । अहं पुनरार्याभिर्वच्मि सुखग्रहणार्थम् । वररुचिप्रभृतिभिरप्याचार्यैरार्याभिरभिहितमेव । तदतिबहुना ग्रन्थेनेत्यहं तु समानेन संक्षेपेण वच्मीत्यत उच्यते नमस्कारः ।

नाम नपुंसकलिङ्गं तत्तनलस्तुत्वशब्दपर्यन्तम् ।
मन्नन्तो द्व्यजुदितमपि सन्तं हल्पूर्वरुयान्तम् ॥२॥

---

१. 'संबन्धः । आवृत्त्याश्चेतो धावति' इति पूर्वमुद्रितोऽपपाठः । 'श्वेतो धावति' उद्धृतं महाभाष्ये पस्पशाह्निके । यथा—'द्विष्ठान्यपि वाक्यानि भवन्ति—श्वेतो धावति, अलंबुसानां याता इति' ।

२. हर्षचरित १।१॥ ३. महाभाष्य १।४।६०॥

यद् व्युत्पत्तिमन्तरेणैवार्थप्रतीतिकरमनादिसांकेतिकमभिधानं तन्नाम पर्यायः रूढशब्द इत्यर्थः। तदिह विशेषणाधिकृतं वेदितव्यं, नपुंसकलिङ्गं च, आ पुँल्लिङ्गात्। त-त्त-न-ल-स्तु-त्व इत्येते शब्दाः पर्यन्तोऽवसानं यस्य तत्तथोक्तं नाम नपुंसकलिङ्गं भवति। त इति— इदं व्रतं नियमग्रहणम्, इदं मतमभिप्रायः, इदं पलितं श्वेतकेशः, क्षतं व्रणम्, अलातमुल्मुकम्। त्त—इदं वृत्तं छन्दोरचना, निमित्तं हेतुः, पित्तं मायुः, चित्तं मनः, वित्तं द्रव्यम्। न—विपिनं वनं, काननमटवी, जघनं पूर्वकटीभागः, आननं मुखम्। ल—शीलं स्वभावः, मूलं प्रसिद्धमेव, जलं सलिलं तोयं, कमलं पद्मम्, उत्पलमिन्दीवरम्। स्तु—इदं वस्तु पदार्थः, इदं मस्तु दध्नो यदधः पानीयं, वास्तु भूमिविशेषः। त्व—इमानि तत्त्वानि पृथिव्यादीनि, इदं सत्त्वं गुणः। नामेति किम्? रचितो ग्रन्थः, कृता स्तुतिः, कृतं कुण्डं, कृत्तः कटः, कृत्ता शाटिका, गोदोहनं घटः, सुशीलः पुरुष इत्यादि। त्तेति तशब्दसंयुक्तग्रहणात्, 'रत्नचिह्न' चेति निर्देशाच्च तत्तनलशब्दाः केवला एव गृह्यन्ते। तेनेह नपुंसकलिङ्गता न भवति—अयमन्तः अवसानं, हस्तः पाणिः, मुहूर्त्तः क्षणः, धम्मिल्लः केशरचना, चिक्खिल्लः कर्दमः मन्शब्दो अन्तो यस्य स मन्नन्तो, द्व्यच् द्वौ अचौ यस्मिन् स द्व्यच्। मन्नन्तो यो द्व्यच्छब्दः स नपुंसकलिङ्गो भवति। इदं साम प्रियं वेदश्च, धाम स्थानं तेजश्च, शर्म सुखं, भस्म भूतिः। पुँल्लिङ्गनिर्देशान्मन्नन्त इत्यत्र सामान्येन शब्दः परिगृह्यते, न नामैव। तेन प्रियस्य भाव इदं प्रेम, बहूनां भाव इदं भूम। द्व्यजिति किम्? अयं तरीमा कल्पः। सवीमा प्रसवः। द्व्यजुदितमपि सन्तम [इति][1]। पुँल्लिङ्गं स्त्रीलिङ्गं वा प्रोक्तमपि सकारान्तं द्व्यच् नाम नपुंसकलिङ्गं भवति— इदं यशः कीर्तिः, तेजः दीप्तिः, ओजः दीप्तिः बलं च, ओकः स्थानं, यादो जलजन्तुः। द्व्यजिति किम्? अयं दोर्बाहुः, अयमनेहा कालः। उदितमपि—इदं रक्षः राक्षसः, तमः राहुः।[2] दैवाभिधानत्वात् पुँल्लिङ्गमुक्तम्। इदं वयः पक्षी। प्राण्यभिधानात्पुँल्लिङ्गमभिहितम्।[3] नामेति किम्? सौजाः पुरुषः, सौजाः स्त्री। सान्तमेव द्व्यजुदितमपि नपुंसकलिङ्गं भवति। अन्यत्र पुनरनुदितमेव वेदित-

---

१. द्र०—कारिका १०।

२. देवाभिधानत्वादित्यपपाठः, 'असुराभिधानत्वात्' इति पाठेन भाव्यम्। द्र०—कारिका १६, व्याख्या च।

३. द्र०—कारिका १६ व्याख्या।

व्यम् । तेनायं पारावतः पक्षी, शैलः पर्वतः, असनः वृक्षविशेषः, पुत्रः तनयः, शत्रुः अरिः, आर्यः साधुरित्यादि । हल्पूर्वो येभ्यस्ते हल्पूर्वा रुयशब्दास्तेऽन्ते यस्य तत् तथोक्तं नाम नपुंसकलिङ्गं भवति । र—गोत्रं कुलं, पात्रं भाजनं, पत्रं पर्णं, वस्त्रं वासः । रु—अश्रु नेत्रवारि, श्मश्रु मुखरोमाणि, जत्रु गलादूर्ध्वम् । य—धान्यं सस्यं व्रीह्यादि, आज्यं घृतं, द्रव्यं धनम् ।

भवनस्य रजतहान्तं चार्थरणापत्यहृदयतालुपुराम् ।
रान्तं च तनोर्द्वारुडुतमसामव्यक्तलिङ्गोक्तौ ॥३॥

र-ज-त-ह-शब्दाः अन्तो यस्य तत्तथोक्तम् भवनस्य गृहस्य नाम नपुंसकलिङ्गं भवति । चशब्दाद्यथोक्तं च । र—अगारं मन्दिरम् । ज—उटजं मुनिगृहम् । पुनः तशब्दग्रहणमन्यस्मात् त-शब्दान्तार्थम्—निशान्तम् । ह—गेहं गृहम् । गृहशब्दस्तु अर्धर्चादिषु पठ्यते । तेन तद्विशेषणे अपि पुँल्लिङ्गेऽपि दृश्यते—अन्तरे गृहाः, अन्तराणि गृहाणि । बाह्याश्चाण्डालादिगृहा इत्यर्थः[2] । चशब्दादुदवसितं भवनं वेश्म धिष्ण्यम् । रजतहान्तमिति किम् ? अयमावसथः भवनं, प्रासादः धवलगृहम्, मठः यतिनिलयः, आवासः आलयः । अर्थादीनां यन्नाम तन्नपुंसकलिङ्गं भवति । इदं द्रविणं द्युम्नं, स्वापतेयं वसु । रणं युद्धमम्बरीषं संयत् संयुगं जन्यं प्रधनमायोधनं मृधं सङ्ख्यं समितं समीकम् । इदमपत्यं तोकम् । प्राणिनो विशेषणमिति पुँल्लिङ्गं वक्ष्यति[3], तस्यापवादः । हृदयं हृत् मानसं स्वान्तमिति । तालु काकुदं, पुरं नगरम् । रान्तं च तनोः—रशब्दान्तं च, चशब्दाद्यथाप्राप्तं च, तनोः शरीरस्य नाम नपुंसकलिङ्गं भवति । इदं शरीरं कडे (ले) वरम् । चशब्दाद्यथाप्राप्तं च—वपुः शरीरम् । रान्तं चेति किम् ? अयं कायो देहः । द्वार्—इदं द्वारं गोपुरम्, उडु भमृक्षं नक्षत्रं, तमः तिमिरं ध्वान्तम् । अन्धकारशब्दस्तु अर्धर्चादिषु पठ्यते[4] । तेन पुँल्लिङ्गेऽपि दृश्यते । “प्रोथितार्यमगं मेरोरन्धकारस्तटीमिव” इति । अव्यक्तलिङ्गोक्तौ—अस्पष्टलिङ्गस्य उक्तावभि-

---

१. द्र०—कारिका ३१ व्याख्या ।

२. तु०—काशिका १।१।३६॥ ३. द्र०—कारिका १६ व्याख्या ।

४. द्र०—कारिका ३१ व्याख्या । ५. शिशुपालवध २।३९॥

धाने यत् प्रयुज्यते तन्नपुंसकलिङ्गं भवति। किं तस्या गर्भे जातम्? यत्तत्रोपपद्यते ग्रामे तदानेयम्। इमानि गोरूपाणि गावो बलीवर्दाश्च समेता उच्यते। इमानि भूतानि सर्वे प्राणिनः। सप्तमीनिर्देशाद्विच्छिष्टैरव्यक्तलिङ्गोक्तौ प्रयुज्यते तन्नपुंसकलिङ्गं भवति। न पुनरव्यक्तलिङ्गाभिधायि नपुंसकं भवति। अन्यथा सुतशिशुगोसिन्धुशब्दानामव्यक्तलिङ्गोक्तौ नपुंसकत्वं प्रयुज्यते।

दलपलबिलहिमखामृतभयमुखसुखदुःखपुण्यपापविशाम्।
प्रसवाभरणविलेयव्यञ्जनफललवणजातीनाम्॥४॥

दलादीनां नामानि नपुंसकलिङ्गानि भवन्ति। इदं दलं पर्णं बर्हः छदनं पलाशं, पल मांसं तरसं, बिलं विवरं गह्वरं, हिमं प्रालेयं तुषारं नीहारम्। खमिन्द्रियं गगनं चोच्यते। तद् द्वयोरपि नाम नपुंसकलिङ्गं भवति। इदं खमिन्द्रियं हृषीकमक्षं, खमम्बरं वियत् विहायः। अमृताभिधानं पीयूषम्। भयं साध्वसम्। भीतिशब्दस्तु भयं भीतिरिति[1] स्त्रियाम् क्तिनि कृते सिद्ध इति व्युत्पत्त्यपेक्षत्वात् नाम नेष्यते। मुखं तुण्डं, पुष्करं मुरजमुखं, सुखं शर्म जोषं, दुःखं द्वन्द्वं, पुण्यं शुभं भाग्यं, पापमघम्। विशो विष्टाया यन्नाम। पुरीषं शकृत् अशुचि गूथम्। प्रसवग्रहणात् कुसुमस्य यन्नाम तन्नपुंसकलिङ्गं भवति। कुसुमं पुष्पम्, कुसुमत्वं जातिसामान्यं येषां तन्नाम नपुंसकलिङ्गं भवति– इदं तामरसं कुशेशयं पुण्डरीकं कह्लारं कुमुदं चम्पकं मुद्गरकं मुचुकुन्दम। आभरणं भूषणम्। आभरणजातीनां नाम– केयूरमङ्गदं कटकं, मुकुटं तिरीटं किरीटम्। विलेयजातीनाम्– विलीयत इति विलेयं विलयनं द्रवत्वं, तत्सामान्यं जातिर्येषां तदभिधानम्– इदं सिक्थं मदनम्। इदं जतु लाक्षा, इदं त्रपु वङ्गं, सीसकं नागं, शुल्बं ताम्रं, लोहं कृष्णमयः, सुवर्णं स्वर्णं, तारं रूप्यकम्। व्यञ्जनजातीनाम्—दधि दुग्धं क्षीरं, तक्रमुदश्वित् कालसेयं, मधु माक्षिकम्। फलादीनां नामानि— कपित्थं दवित्थं पनसं लकुचम्। लवणजातीनां नाम– विडमौद्भिदं रोमकम्। लवणग्रहणाद्यदग्निना विलीयते तन्नपुंसकं भवति, न पुनर्यज्जलेनापि, अन्यथा मृदोऽपि नपुंसकत्वं प्रयुज्यते।

---

१. द्र०—'भयभीतभीतिभिरिति वक्तव्यम्' (वा० २।१।३७)। मूलपाठे कदाचित् 'भयभीतभीतिभीभिरिति' युक्तः पाठः स्यात्।

दार्वश्रौषधजलधनुरुदराजिरशिखरवस्त्रपिच्छानाम् ।
द्विगुरपि पात्राद्यन्तः क्रियाव्ययविशेषणश्चैक्ये ॥५॥

दार्वादीनां नाम नपुंसकलिङ्गं भवति—इदं दारु काष्ठम्, अश्रं रुधिरं रक्तं क्षतजम्, औषधं भेषजं, जलं तोयं पानीयं नीरं वारिकं, धनुश्चापं कार्मुकं कोदण्डम्, उदरं जठरं तुन्दम्, अजिरं प्राङ्गणं, शिखरं शृङ्गं कूटं, वस्त्रमम्बरमंशुकं प्रावरणं, चीवरं चीरं भिक्षुपरिधानम्। पिच्छं बर्हम्। द्विगुश्च समासः पात्रादिशब्दोत्तरपदः नपुंसकलिङ्गो भवति। क्रियाया अव्ययस्य च यो विशेषणशब्दः स च नपुंसकलिङ्गो भवति। उभावप्यैक्ये एकत्वे भवतः—त्रीणि पात्राणि समाहृतानि त्रिपात्रं, चतुष्पात्रं, त्रिभुवनं, चतुर्युगं, द्विपथं, त्रिपथं, चतुष्पथं, त्रिरात्रम्। क्रियाविशेषणः—मृदु पचति, नीचं गच्छति, लघु आगच्छति। अव्ययविशेषणः—पुरस्ताद्रमणीयां दिग्देशः कालो वा। पुँल्लिङ्गनिर्देशान्नामैव न गृह्यते। तेन सविनयं पृच्छति, सबहुमानमामन्त्रयते।

छाया सभा बहूनां सङ्घे राजार्थराक्षसादीनाम्।
भवने च तत्समासे द्वन्द्वैकत्वाव्ययीभावौ ॥६॥

येषां बहूनां समुदितानां सतां छाया भवति, तेषां सम्बन्धिनी छाया तैश्च सह समासे नपुंसकलिङ्गं भवति। शलभानां छाया शलभच्छायम्, इषुच्छायं, धनुच्छायम्। बहूनामिति किम्? वृक्षस्य च्छाया वृक्षच्छाया वृक्षच्छायम्। नित्यं नपुंसकार्थमिदं वचनम्। तत्समास इति किम्? शलभानां परमच्छाया। सभाशब्दः सङ्घे वाच्ये येषां च सङ्घस्तैः सह समासे नपुंसकलिङ्गं भवति। स्त्रीणां सभा स्त्रीसभं, ब्राह्मणानां सभा ब्राह्मणसभं सङ्घ इत्यर्थः। सभा राजार्थराक्षसादीनां भवने च। राजाभिधेयो येषां शब्दानां तेषां सम्बन्धिनी सभा भवने वाच्ये तैश्च सह समासे नपुंसकलिङ्गं भवति। इनस्य सभा इनसभम्, ईश्वरसभं नृपतिसभं भवनं सङ्घो वा। राजार्थानामिति किम्? राजशब्देन सह समासेऽपि न भवति।

राजसभा, जगत्तुङ्गसभा। राक्षसादीनां राक्षसप्रकाराणां सभा सङ्घे भवने च वाच्ये तत्समासे नपुंसकलिङ्गा भवति—राक्षसानां सभा राक्षससभं, पिशाचसभं सङ्घ इत्यर्थः। राक्षससभं भवनम्। द्वन्द्वैकत्वाव्ययीभावौ। द्वन्द्वस्य यदेकत्वमेकवद्भावः स नपुंसकलिङ्गो भवति—पाणिपादं, मार्दङ्गिकपाणविकं, हस्त्यश्वं, धवखदिरपलाशं, शशहरिणम्, अहोरात्रम्। अव्ययीभावसमासश्च नपुंसकलिङ्गो भवति—अधिस्त्रि, उपबन्धु। पञ्चनदं, सप्तगोदावरं, शनैर्गङ्गम्, उन्मत्तगङ्गं, लोहितगङ्गम्, इत्यत्र यद्यप्यन्यपदार्थेऽव्ययीभावस्तथापि वाच्यवल्लिङ्गं न भवति, अव्ययीभावसामर्थ्यात्।

कृतषष्ठ्यन्तसमासे तदादिकथने ह्युपक्रमोपज्ञे।
कन्थोशीनरदेशे नाम्न्यव्ययपूर्वकश्च पथः ॥७॥

उपक्रम्यत इत्युपक्रमः। "अकर्त्तरि च कारके सञ्ज्ञायाम्" (३।३।१९) इति कर्मणि घञ्। उपज्ञायत इत्युपज्ञा। "आतश्चोपसर्गे" (३।३।१०६) इति कर्मण्येव स्त्रियामङ्। उपक्रमोऽश्चोपज्ञा च षष्ठ्यन्तेन सह समासे कृते नपुंसके भवतः। तदादिकथने। तस्य उपक्रमस्य उपक्रम्यस्य च प्राथम्यकथने, तस्याश्चोपज्ञाया उपज्ञेयस्य च प्राथम्यकथने गम्यमाने—नन्दस्य उपक्रमाः नन्दोपक्रमाणि मानानि। नन्देन किल प्रथमं मानानि कृतानि। तथा पाणिनेरुपज्ञा पाणिन्युपज्ञमकालकं व्याकरणम्। पाणिनिना प्रथमं कालाधिकाररहितं व्याकरणं कर्तुं शक्यमिति परिज्ञातम्। तथा चन्द्रोपज्ञमसंज्ञकं व्याकरणम्। तदादिकथन इति किम्? देवदत्तोपक्रमः प्राकारः, यज्ञदत्तोपज्ञो रथः। आद्यज्ञानमुपज्ञा। कन्थोशीनरदेशे नाम्नि। कन्थाशब्दः कृतषष्ठ्यन्तसमासः नाम्नि गम्यमाने नपुंसकलिङ्गो भवति, सा चेत् कन्था उशीनरदेशे भवति—सौशमीनां कन्था सौशमिकन्थम्, आह्वरकन्थम्। नाम्नीति किम्? वीरणानां कन्था वीरणकन्था, वीरणरचितः कटः। उशीनरदेश इति किम्? दाक्षीणां कन्था दाक्षिकन्था। ग्रामस्येयं संज्ञाऽस्ति, किन्तु उशीनरदेशे स ग्रामो न भवति। अव्ययपूर्वकश्च पथः। पथ

इत्येष कृतसमासान्ताच्प्रत्ययः अव्ययपूर्वकः स नपुंसकलिङ्गो भवति—कुत्सितः पन्थाः कापथम् । "ऋक्पूरब्धूःपथामानक्षे" (५।४।७४) इत्यच् प्रत्ययः । "नस्तद्धिते" (६।४।१७४) इति टिलोपः । "कापथ्यक्षयोश्च" (तु०— ६।३।१०४) इति कोः कादेशः । विरूपः पन्थाः विपथं, दुष्पथम् । अव्ययपूर्वक इति किम् ? जले पन्थाः जलपथः । कृतसमासान्तग्रहणं किम् ? शोभनः पन्थाः सुपन्थाः । "न पूजनात्" (५।४।६९) इति समासान्तप्रतिषेधः । चशब्दाद्यथाप्राप्तं च पथशब्दस्य लिङ्गं भवति—द्वौ पन्थानौ समाहृतौ द्विपथं, त्रिपथं, चतुष्पथमिति । द्विगुरपि पात्राद्यन्त[1] इति नपुंसकत्वम् – न विद्यते पन्था यत्र स देशः अपथो देशः, साऽटवी अपथा, तद्वनमपथमिति वाच्यवत् परत्वाल्लिङ्गं भवति ।

भावेऽचिन्नणकान्तोऽदन्तो हि समूहभावकर्मार्थः ।
धर्मार्धसारमित्राः स्वाङ्गदलन्यायसुहृदर्थे ॥८॥

भावेऽभिधेये यः शब्दो भवति अदन्तः स नपुंसकलिङ्गो भवति । चकार इद्यस्य स चित्, चिच्च नश्चाणश्च कश्च चिन्नणकास्ते प्रत्यया अन्तो यस्य स तथोक्तः, तदन्यप्रत्ययान्तः भावे अकारान्तः नपुंसकलिङ्गो भवति—हसितं छात्रस्य शोभनं भक्तं लब्धं सिद्धं करण हरणम् । सांराविणं सान्द्राविणमित्यत्र 'रु शब्दे' 'द्रु गतौ' इत्येताभ्यां सम्पूर्वाभ्याम् "अभिविधौ भाव इनुण्", (३।३।४४) इति इनुण्प्रत्ययः । वृद्धिरावादेशः । "अणिनुणः" (५।४।१५) इति तद्धितः अण् । आदिवृद्धिरनुस्वारः । "इनण्यनपत्ये" (५।४।१५४) इति प्रकृतिभावः । "अट्कुप्वाङ्०" (८।४।२) इति णत्वम् । आसितव्यं, शयितव्यम्, शयनीयं, स्थेयं, स्थातव्यम् । ईषदाढ्यंभवं, दुराढ्यंभवमित्यत्र "कर्तृकर्मणोश्च भूकृञोः" (३ । ३ । १२७) इति खल्प्रत्ययः । "अरुर्द्विषदजन्तस्य मुम्" (६।३।३७) इति मुमागमः । देवभूयम् । "भुवो भावे" (३। १। १०७) इति क्यप् । "भावे चाकर्मकेभ्यः"[2] इत्यधिकृत्य "तयोरेव कृत्यक्तखलर्थाः[3]" इति भावे विधानम् । अचिन्नण-

---

१. द्र०—कारिका ५ ।　　२. द्र०—अष्टा० ३।४।६९॥

३. अष्टा० ३।४।७० ।

कान्त" इति किम् ? "एरच्" (३।३।५६)—चयः, नयः । "आशिते भुवः करणभावयोः" (३।२।४५) इति खच्—आशितंभवो वर्तते । न इति नङ्ननोः सामान्येन ग्रहणात् "यजयाचयतविच्छप्रच्छरक्षो नङ्" (३।३।९०)—यज्ञः, यत्नः, विश्नः, प्रश्नः, रक्ष्णः । याच्ञा तु दीर्घान्तत्वात् स्त्रीलिङ्गा भवति[1] । "स्वपो नन्" (३।३।९१) स्वप्नः । णन्त्यादः (?,णन्तोऽदः) । "नौ ण च" (३।३।६०) इत्यदो णप्रत्ययः । क—आखूनामुत्थानमाखूत्थो वर्त्तते । "पिच्छ"[2] इत्यत्र छग्रहणाद्भावे कप्रत्ययः । अदन्त इति किम् ? कारणा, हारणा, छिदा, भिदा, कृतिः, धृतिः, हृतिः । समूहभावकर्मार्थः । समूहः भावः कर्म चार्थोऽभिधेयं यस्य स तथोक्तः शब्दः अदन्तः नपुंसकलिङ्गो भवति —भैक्षं पादातम् । "भिक्षादिभ्योऽण्" (४।२।३८) इत्यण् प्रत्ययः । राजकं, राजन्यकं, अस्त्रीयम् । भावार्थः—श्वेतत्वं श्वैत्यं, कार्ष्ण्यं, दाढर्चम् । "वर्णदृढादिभ्यः ष्यञ्च" (५।१।१२३) इति ष्यञ् । कर्मार्थः—ब्राह्मण्यम्, आधिपत्यम् । "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (५।३।१२४) इति ष्यञ् । सख्यं स्तेयम् । "स्तेनाद्यन्नलोपश्च" (५।१।१२५) इति यत् नलोपश्च । गौरवं लाघवं मार्दवम् । अदन्तेति किम् ? ग्रामता, जनता, बन्धुता, सहायता, गजता, राजता, श्वेतता, रक्तता, ब्राह्मणता । आकारान्ता अभी समूहभावकर्माण्यभिधातुं समर्था नान्यथेति । प्रथिमा, म्रदिमा, गरिमा, लघिमा । "पृथ्वादिभ्यः इमनिच् वा" (५।१।१२२) इति इमनिच् । नान्तत्वात् पुंलिङ्गता भवति । धर्म-अर्ध सार मित्र-इत्येते शब्दाः स्वाङ्ग-दल-न्याय्य-सुहृद् इत्येतेष्वभिधेयेषु नपुंसकलिङ्गा भवन्ति । धर्मशब्दः धर्मसाधने यागादौ वाच्ये । इदं धर्मम् । तानि धर्माणि प्रथमान्यासन्[3] । स्वाङ्ग इति किम् ? "एष धर्मः सनातनः[4]" इति । अर्धशब्दः दले, द्वयोः समप्रविभागे । इदमर्धं पिप्पल्याः अर्धपिप्पली, अर्धहरीतकी । दल इति किम् ? सोमस्यार्धः सोमार्धः । अत्रार्धशब्द एकदेशवचनः । अत एव "अर्धं० नपुंसकम्"

---

१. द्र०—कारिका २२ व्याख्या ।

२. लोमादिपामादिपिच्छादिभ्यः० (५।२।१००) सूत्रे ।

३. ऋग्वेद १०।९०।१६॥

४. उत्तररामचरित ५।२२॥

(२।२।२) इत्येष समासो न भवति। सारशब्दः न्यायादनपेते । इदं सारं न्याय्यम्। तथा सारं च तत्सङ्ग्रहश्च—"सारसङ्ग्रहः[1]" इति। न्याय्य इति किम् ? अयं सारः प्रधानम्। मित्रशब्दः सुहृदि सख्यौ। इदं मित्रं सखेत्यर्थः। सुहृदिति किम् ? अयं मित्रः रविः। मरुद्विशेषाभिधानत्वात् पुँल्लिङ्गत्वं मित्रशब्दस्य[2]। शेषाणामदन्तत्वात् पुँल्लिङ्गता ।

कुहकं चिबुकं लिङ्गं क्रकचं बीजं ललाटशृङ्गाटम् ।
वटपिटलोष्टकरोटं पीठं पृष्ठं च कुष्ठं च ॥९॥

कुहकादीनि नामानि नपुंसकानि भवन्ति। एषामप्यदन्तत्वात्[3] पुँल्लिङ्गं प्राप्तम्—इदं कुहकम् आश्चर्यं, चिबुकं हनुः, लिङ्गं मेढ्रः चिह्नं च, क्रकचं करपत्रं, बीजमङ्कुरं प्रकृतिः। ललाटं प्रसिद्धमेव। शृङ्गाटं त्रिकोणं, वटं वटकं, पिटं पिटकं, लोष्टं मृत्पिण्डखण्डं, करोटं करोदकं, पीठं स्थापनम्। पृष्ठं प्रसिद्धमेव। कुष्ठं त्वग्दोषः द्रव्यविशेषश्च।

कुण्डाण्डभाण्डकारणशरणमृणक्षूणमुष्णतीर्थोक्थम् ।
गुदवृन्दकुसीदानि श्राद्धान्ने रत्नचिह्ने च ॥१०॥

कुण्डादीनि नामानि नपुंसकानि भवन्ति—इदं कुण्डं प्रसिद्धमेव। अण्डं जन्तुनां कललाधारः। भाण्डं द्रव्यं भाजनं च, कारणं हेतुः, शरणं गृहावस्थानं तत्परता च, ऋणं देयद्रव्य, क्षूणं विकलता, उष्णमातपः, तीर्थं जलावतरणं पुण्यप्रदेशश्च, उक्थं सामवेदः, गुदं पायुः, वृन्दं सङ्घातः, कुसीदं विज्ञानं वाणिज्यादि च, श्राद्धं विधिपूर्वकं ब्राह्मणनां भोजनम्, अन्नमोदनानि। रत्नं प्रसिद्धमेव। चिह्नं लिङ्गम्।

रूपं तल्पं शिल्पं समीपकूपोडुपान्तरीपाणि ।
बिम्बकुटुम्बे कुङ्कुमसिध्मेध्मयुग्मगुल्मं च॥११॥

रूपादीनि नामानि नपुंसकानि भवन्ति—रूपमाकृतिः, तल्पं

---

१. काशिका-वृत्ति, प्रारम्भिकश्लोकः ।

२. द्र०—कारिका १६ व्याख्या । ३. द्र०—कारिका १५ व्याख्या ।

शयनीयमट्टदाराश्च, शिल्पं विज्ञानं, समीपमासन्नता, कूर्पं भ्रुवोर्मध्ये रोम, उडुपं प्लवः, अन्तरीपं जलमध्याश्रयं, बिम्बमाकृतिस्थानं, कुटुम्बं भार्यादि, कुङ्कुमं गन्धद्रव्यं, सिध्मं त्वग्दोषः, इध्मं समित्, युग्मं युगलं, गुल्मं वीरुत् व्याधिविशेषश्च ।

किसलयशिशिरकुकुन्दरचामरकान्तारतीरदूराणि ।
वैराक्षरान्तरोषरकिण्वशरावाणि दैवं च ॥१२॥

किसलयादीनि नामानि नपुंसकानि भवन्ति— किसलयं पल्लवः, शिशिरमृतुविशेषः, कुकुन्दरं नितम्बस्थकूर्पकः, चामरं वालव्यजनं, कान्तारमटवी, तीरं तटं, दूरं विप्रकृष्टम् । वैरं प्रसिद्धमेव । अक्षरमकारादिवर्णः, अन्तरं मध्य, ऊषरं यत्रोप्तं न प्ररोहति, किण्वं सुरायाः कारणं (मलम् ?), शरावं मृत्पात्रं, दैवं पुराकृतं कर्म ।

कणिशं बडिशं पलिशं शीर्षं वर्षं च साहस सबुसम् ।
पुण्याहं सुदिनाहं यकृत्पुरीतज्जगद्भुवनम् ॥१३॥

कणिशादीनि नामानि नपुंसकानि भवन्ति— कणिशं शाल्यादीनां मञ्जरी, बडिशं मत्स्यग्रहणं, पलिशं झाटकविशेषः, शीर्षं मूर्द्धा, वर्षं वत्सरः, साहसं दुष्करं कर्म, बुसं धान्यमलः । पुण्यं च तत् अहश्च तत् पुण्याहम्, तथा सुदिनाहं, "राजाहःसखिभ्यष्टच" (५ । ४ । ९१) इति टच् प्रत्ययः, । "परवल्लिङ्गं द्वन्द्वे तत्पुरुषे च" (तु०—२।४।२६) इति नपुंसकत्वे सिद्धेऽपि नियमार्थं वचनम् । अन्यशब्दपरस्य तत्पुरुषे अहःशब्दस्य कृतटच्प्रत्ययस्य नपुंसकत्वं न भवति, अदन्तत्वात्पुँल्लिङ्गं भवति— द्वे अहनी समाहृते द्व्यहः, त्र्यहः, पञ्चाहः, दशाहः, परमाहः, उत्तमाहः । यकृत् कालिजं, पुरीतत् अन्त्रं, जगत् लोकः, भुवनं स्वर्गः ।

नीडं गृहशशपूर्वे स्थूणोर्णे गन्धमादनास्थ्यक्षि ।
सक्थ्यररिकशिपुजानु च कसेरुतोरणबिसार्धंटच्चाहः ॥१४॥

नीडादीनि नामानि नपुंसकानि भवन्ति—नीडं कुलायः पक्षिणामावासः । गृहशब्दपूर्वः स्थूणाशब्द शशपूर्वश्च ऊर्णाशब्दः नपुंसके

भवतः—गृहस्थूणं,शशोर्णम्। गृहस्य स्थूणा शशस्योर्णेति परवल्लिङ्गत्वे[1] प्राप्ते नपुंसकार्थं वचनमिदम्। इदं गन्धमादनं पर्वतविशेषः। अस्थि पञ्चमो धातुः। "**रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः**"[2]। इदमक्षि लोचनं, सक्थि सक्थिकम्, अररि कपाटः, कशिपु ग्रासाच्छादनं, जानु जङ्घामध्यपर्व, कसेरु कन्दविशेषः, तोरणं भवनादीनां द्वारम्। इदं विसं मृणालमूलम्। अर्धटच्—अर्धात्परष्टच् यस्तदन्तशब्दः। अर्धं नाव इति विगृह्य "**अर्धाच्च**" (५।४।१००) इति समासान्ते टचि कृते परवल्लिङ्गत्वे[3] प्राप्ते नपुंसकार्थं वचनमिदम्। अर्धनावम्। एवमर्धखारमित्यत्र "**खार्याः प्राचाम्**" (५।४।१०१) इति टचि कृते। इदमहः दिवसः। नान्तत्वात् पुँल्लिङ्गे प्राप्ते वचनम्।

इति नपुंसकलिङ्गं समाप्तम्॥

—:०:—

पुँल्लिङ्गं स्नदुदन्तोऽप्घञ्क्यन्तोऽस्यगनदाब्धिकूपानाम्।
स्वर्वज्रपरशुरथमखघनघृणिरदपुष्यवलतानाम् ॥१५॥

पुँल्लिङ्गमधिकृतं वेदितव्यम्, आ स्त्रीलिङ्गात्। सकार-नकार-अकार-उकारान्तः शब्दः पुँल्लिङ्गो भवति। संतः—अयमनेहा कालः, दोर्बाहुः। नंतः—धन्वा निर्जलो देशः, प्लीहा व्याधिविशेषः, मूर्द्धा शिरः, मज्जा षष्ठो धातुः। अकारान्तः—नगः वृक्षः पर्वतश्च, नरः, किन्नरः, पुरुषः, देवः, संचयः, चयः। उकारान्तः—तरुः वृक्षः, कारुः शिल्पी, वायुः मरुत्, सेतुः जलबन्धः, केतुः ध्वजः एवमादि। अन्तशब्दग्रहणादनाम्नोऽपि—महिमा महतो भावः, गरिमा गुरोर्भाव इति विगृह्य। अप्घञ्क्यन्तः। अप्घञ्किप्रत्ययान्तः शब्द पुँल्लिङ्गो भवति। "**भावेऽच्निनणक्रान्तोऽदन्तो हि**"[5] इति नपुंसकत्वे प्राप्ते अप्घञन्तयोः पुँल्लिङ्गार्थं वचनम्। "**ऋदोरप्**" (३।३।५७)—दरः, नरः, प्रकरः, लवः, प्लवः, भवः। घञन्तः—पाकः, त्यागः। अत्राप्घञ्ग्रहणं पूर्वनपुंसकलक्षणबाधनार्थम्। तेन अयमुद्घनः यत्र काष्ठानि संस्थाप्य हन्यन्ते।

---

१. द्र०—कारिका ३०। २. अनुपलब्धमूलम्।
३. द्र०—कारिका ३०। ४. द्र०—कारिका १५।
५. द्र०—कारिका ८।

"उद्घनोऽत्याधानम्" (३ । ३ । ८०) इत्यबन्तो निपात्यते । "आङि युद्धे" (३ । ३ । १३) इत्यप्—आहवः रणम् । "अपघनोऽङ्गम्" (३ । ३ । ८१) इति अपघनः हस्तः पादो वा । "मूर्तौ घनः" (३ । ३ । ७७) इति घन इति काठिन्यमित्यर्थः । संहननं संघातः, उपोद्घातः, उद्घातः, निघातः, उत्पातः । मन्त्रणं मन्त्रः । निकित्यतेऽस्मिन्निति निकेतो वेश्म । अलङ्करणमलङ्कारः आभरणम्, क्लेशनं क्लेशः दुःखम् । सङ्ग्रामः युद्धम् । आदिः निधिः विधिः आधिः उपाधिः जलधिः अब्धिः वालधिः । असि-अग-नद-अब्धि-कूपानां नाम पुँल्लिङ्गं भवति— अयमसिः करवालः खडगः, पर्वतः शैलः अद्रिः गिरिः । नदाभिधानम्—भिद्यः, उध्यः, लौहित्यः । अब्धिः समुद्रः उदन्वान् । अयं कूपः प्रधिः उदपानः । स्वर्नाम— अयं त्रिदिवः स्वर्गः । वज्रनाम— दम्भोलिः शतकोटिः पविः वज्रम् । वज्रशब्दस्त्वर्धर्चादिषु दृश्यते[1] । तेन—

"स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्"[2]

तथा—[**"जान्वञ्चितातिहिमलीमसशाटकानां**
मित्रादपि प्रथमयाचितभाटकानाम् ।
पुत्रादपि प्रियतमैकवराटकानां
वज्रं दिवः पततु मूर्ध्नि किराटकानाम् ।"[3]] इति

परशुः छिदिः भिदिः, रथः स्यन्दनः चक्री, मखः यज्ञः अध्वरः वितानः, घनः जीमूतः पर्जन्यः, घृणिः रश्मिः, रदः दशनः रदनः, पुष्यः तिष्यः सिध्यः, वलतः कुशूलः धान्यकोष्ठकः ।

ध्वनितरुविषमासासुरवर्णमरुत्प्राणिनां विशेषाणाम् ।
धान्यानां रात्रो ह्यसमाहारे दुन्दुभिरनन्ते ॥ १६ ॥

ध्वनिनाम ध्वनिविशेषाणां च नाम पुँल्लिङ्गं भवति—अयं ध्वनिः कलकलः कोलाहलः । ध्वानविशेषाणां नाम—उदात्तः अनुदात्तः स्वरितः धैवतः । तरु वृक्षः । तरुविशेषनाम—तालस्तमालः, रसालश्चूतः

---

१. द्र० —कारिका ३१ ।

२. पाणिनीय शिक्षा (श्लोकात्मिका), महाभाष्य पस्पशाह्निक ।

३. अनुपलब्धमूलम् ।

आम्रः, अर्जुनः असनः, चन्दनः । विषनाम—हालाहलः मोहनः । मासविशेषाणां नाम—शुचिः शुक्रः नभस्यः । असुरनाम—दैत्यः । विशेषनाम—बलिः नमुचिः, शुचिः[1] । वर्णविशेषः—श्वेतः नीलः लोहितः हरितः । मरुत् देवः । तद्विशेषः—इन्द्रः आदित्यः रविः अग्निः वह्निः । मरुद्वायुश्चोच्यते । तेन तन्नामविशेषश्च पुंसि भवति—मरुद्वातः, अपानः उदानः पवमानः व्यानः प्रभञ्जनः । प्राणिनो नाम तद्विशेषाणां च नाम पुँल्लिङ्गं भवति—पिता भ्राता जामाता नप्ता, षण्ढः वर्षधरः, सप्ति अलिः कपिः अहिः बक कपोतः पारापतः अनड्वान् । विशेष नाम—दूतः पण्डितः कविः मुनिः यतिः ऋषिः विपश्चित् सुहृत् दुर्हृत् शत्रुः सुतः आर्यः राजा युवा राजन्यः । प्राणिन इत्येकवचननिर्देशाद् बहूनां प्राणिनां समेतानां यन्नाम तदनेन पुँल्लिङ्गं न भवति । इयं श्रेणिः शिल्पसमूहः, इयं परिषत् शिष्टसमुदायः । धान्यानां यन्नाम पुँल्लिङ्गं भवति—शालिः व्रीहिः तिलः । रात्रिशब्दः समासान्ताच्प्रत्ययो गृह्यते । सोऽसमाहारे वर्त्तमानः पुँल्लिङ्गे भवति । अहश्च रात्रिश्चेति विगृह्य "**अहःसर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः**" (५।४।८७) इति टच्प्रत्ययः । "**यस्येति च**" (६।४।१४८) इति टिलोपः । **अहोरात्राविमौ पुण्यौ**"[2] । सर्वरात्रः पूर्वरात्रः मध्यरात्रः वर्षारात्रः दीर्घरात्रः । समाहार इति किम् ? अहोरात्रं द्विरात्रं त्रिरात्रं पञ्चरात्रम् । "**द्विगुरपि पात्राद्यन्त**"[3] इति नपुंसकता । दुन्दुभिरनक्षे । दुन्दुभिशब्दः अनक्षेऽभिधेये पुँल्लिङ्गो भवति—दुन्दुभिः भेरीविशेषः विषं चोच्यते । अनक्ष इति किम ? इयं दुन्दुभिः अक्षम् । उक्तं च—"**दुन्दुभ्या किल तत्कृतं पतितया यद् द्रौपदी हारिता**"[4] ।

ग्रन्थिकलिकेलिबलिगिरिदृतिराशि च मौलिकुक्षिपाण्यङ्घ्रि ।
अञ्जलिहाहाहूहूसङ्केतव्रातपोतपुताः ॥१७॥

ग्रन्थिप्रभृतयः शब्दाः पुँल्लिङ्गा भवन्ति—अयं ग्रन्थिः प्रसिद्ध एव ।

---

१. किमत्र 'शुचिः' असुरविशेषस्य नाम, यद्वा लेखकप्रमादाद् आपतितः पाठ इति विवेचनीयम्

२. अनुपलब्धमूलम् । काशिकायाम् (२।४।२८) अपि पठ्यते ।

३. द्र०—कारिका ५ ।

४. अयं श्लोकांशः शाकटायनलिङ्गानुशासनव्याख्यानेऽप्युद्ध्रियते ।

कलिः कलहः युगं च, केलिः परिहासः, बलिः उपहारः, गिरिः कन्दुकः, दृतिः चर्ममयो जलाधारः, राशिः पुञ्जः। चशब्दः प्राण्यङ्गाप्राण्यङ्गयोर्विभागार्थः। तेनेह ग्रन्थ्यादिपठितो वलिशब्दोऽप्राण्यङ्गः पुँल्लिङ्गो भवति। प्राण्यङ्गस्तु स्त्रीलिङ्गो भवति—इयं वलिः वली। मौलिः शिरश्चूलिका इति। कुक्षिराहाराधारः, पाणिः हस्तः, अङ्घ्रिः पादः, अञ्जलिः करविन्यासः। हाहाहूहू गन्धर्वौ। सङ्केतः प्रसिद्ध एव। व्रातः सङ्घातः, पोतः यानपात्रं, पुतः स्फिक्। सङ्केतादीनां तान्तत्वान्नपुंसकत्वं प्राप्तम्[1],पुँल्लिङ्गार्थं वचनम्।

स्तनवातायनहायनजनौदनाऽभिजनफेनवेमाश्म।
श्लेष्मोष्मपाप्मयक्ष्मात्मवध्र्र[4]मेढ्राश्च मन्त्रयुताः ॥१८॥

एते स्तनादयः[2] पुँल्लिङ्गा भवन्ति—अयं स्तनः कुचः, वातायनो गवाक्षः, हायनः संवत्सरः, जनः लोकः, ओदनः तण्डुलपाकः, अभिजनः कुलीनता, फेनः जलविकारः, वेमा तन्तुवायोपकरणः, अश्मा पाषाणः, श्लेष्मा कफः, ऊष्मा उष्णत्वं, पाप्मा पापं, यक्ष्मा क्षयरोगः, आत्मा जीवः, वध्रः चर्मतन्तुः,मेढ्रः शेफः, मन्त्रः उँकारादिवर्णरचना। स्तनादीनां नान्तत्वात्, वेमादीनां मन्नन्तत्वात्, वध्रादीनां हल्पूर्वरान्तत्वात्[3] नपुंसकत्वं प्राप्तम्।

गर्त्तोऽवटो निकाय्योऽथाच्छादन[4]पटस्तथोत्तरासङ्गः।
नूपुरहारकलापा रैकोशस्वार्थविभवाश्च ॥१९॥

गर्त्तादयः पुँल्लिङ्गा भवन्ति—अयं गर्त्तः प्रसिद्धः एव। अवटः श्वभ्रं, निकाय्यः गेहम्, अयमाच्छादनपटः। उत्तरासङ्गः वस्त्रम्, नूपुरः हारः कलापः आभरणजातिः। राः धनं, कोशः निधिः, स्वः वित्तम्, अर्थः विभवः। चशब्दः पादपूरणार्थः।

बहवश्च सक्तुवल्वजदारालाजाऽसुगृहा दशा वास्त्राः।
नाडयनआदिजनापपराणि व्रणयुगपदाङ्गानि ॥२०॥

एते शब्दाः पुँल्लिङ्गा भवन्ति, चशब्दाद् बहवश्च भवन्ति—इमे सक्तवः यवचूर्णः। इमे वल्वजाः वीरणरचितकटः। इमे दाराः[5]

---

१. द्र०—कारिका २। २. स्तनादीनां नान्तत्वान्नपुंसकत्वं प्राप्तम्। द्र०—कारिका २। ३. द्र०—कारिका २। ४. 'छादपट' इति बड़ोदामुद्रितेऽपपाठः।

५. बहुत्वं प्रायिकम्। एकवचनान्तेऽपि प्रयोगदर्शनात्। तद्यथा—

भार्या। लाजा असु इति पृथक्पदकरणात्[1] तत्पर्यायस्यापि पुंस्त्वं बहुत्वं च भवति। इमे लाजा अक्षताः, इमे असवः प्राणाः। इमे गृहाः गेहम्। अर्धर्चादित्वादिदं गृहं गेहे गृहाणि। इमे दशाः वस्त्रस्यावयवभूताः। वास्त्रा इति किम्? इयं दशा वयोऽवस्था। नाडी-अनस्-आदि-जनाप इत्येतेभ्यः पराणि व्रण-युग-पद-अङ्ग इत्येतानि नपुंसकानि सन्ति पुँल्लिङ्गानि भवन्ति—नाडीव्रणः, अनोयुगः शकटयुगं, जनपदः देशः, अपाङ्गः कटाक्षः। एतत्पराणीति किम्? शिरोव्रणं शिरोव्रणः, कलियुगं, वस्त्रयुगम्, गोष्पदम, आस्पदम्, उत्तमांगं, वराङ्गम्। व्रणं व्रणः, युगं पदमङ्गम्। रान्तं चेति[2] चशब्दान्नपुंसकता युगादीनाम्।

मलखलकपोलकम्बलचषालकल्लोलकालकीलगलाः।
तरलप्रवालतण्डुलकललोपलतूलफालपूलनलाः ॥२१॥

मलादयः शब्दाः पुँल्लिङ्गा भवन्ति—अयं मलः प्रसिद्ध एव। खलः पिण्याकः। मलशब्दसाहचर्यात् खलशब्दो यः मलवाची स पुँल्लिङ्गो भवति। अन्यार्थस्य तु यथाप्राप्तमेव लिङ्गं भवति। इदं खलं धान्यमर्द्दनभूमिः, अयं खलो दुर्जनः। कपोलः गण्डः, कम्बलः ऊर्णामयं प्रावरणं, चषालः यूपकटकं, कल्लोलः वीचिः,कालः त्रुट्यादिलक्षणः, कीलः कीलनद्रव्यं, गलः कण्ठः, तरलः हारमध्यमणिः, प्रवालः अङ्कुरः, तण्डुलः फलान्तः कणः, कललः[3] शुक्रशोणितसमवायः, उपलः पाषाणः, तूलः अर्कादीनां फलान्तर्वस्तु, फालः अयोमयो गोलः समन्ततो वृतः, पूलस्तृणसङ्घातः,नलः तृणविशेषः।

इति पुँल्लिङ्गाधिकारः समाप्तः ॥

—:०:—

'आचार्यदारे' (आप० धर्म० १।२।७।२७) 'दारे' तन्त्राख्यायिका (पृष्ठ ६७, श्लोक १५८), श्रोत्रियस्य दारेण (बृ० उ० ६।४।१२)।

१. एतेन ज्ञायते यदस्यां (२०) कारिकायां 'लाजाऽसु' इत्येवं पाठोऽशुद्धः। तत्र 'लाजा असु' इत्येवं शुद्धः पाठः स्यात्। २. द्र०—कारिका ३।

३. तु० कार्या—एकरात्रोषितं कललं भवति। निरु० १४।६॥ कललं शुक्रशोणितयोरीषद्घनः परिणामः। हैम-लघुन्यास पत्रा १६ ख। अत्रोभयत्र नपुंसके प्रयोगः॥

स्त्रीलिङ्गं योनिमतां प्राग्दीर्घान्त उदितोऽप्यनुक्त इह ।
द्रुहलिल्लिदन्तदीधितिजात्याजिदरद्द्युविट्छर्दिः ॥२२॥

स्त्रीलिङ्गमधिकृतं वेदितव्यमा विषकुलिशसंशब्दनादिति । योनिमताम् । योनिर्भगः तद्वतां प्राणिनां यदभिधानं तत् स्त्रीलिङ्गं भवति—इयं माता जननी, इयं स्वसा भगिनी, दुहिता सुता, ननान्दा भर्तृभगिनी, याता देवरभार्या, दनुर्दानवमाता, कद्रूः नागमाता, दितिर्दैत्यमाता, योषित् युवतिः, स्त्री भार्या, जाया पत्नी । प्राग्दीर्घान्तः।शब्दः प्राक् पूर्वस्मिन् उदितोऽपि कथितोऽप्यन्यलिङ्गः स्त्रीलिङ्गो भवति—इयं शमी शिंशपा रोहिणी । तरुविशेषत्वात्पुंल्लिङ्गमुक्तम्[1] । द्राक्षा तिन्तिडिका । फलजातित्वान्नपुंसकत्वं[2] प्राप्तम् । मल्लिका मालती केतकी । कुसुमजातित्वादेषां नपुंसकत्वम्[3] उक्तम् । मक्षिका यूका पिपीलिका । प्राणित्वात्पुंस्त्वमुक्तम्[4], तथापि दीर्घान्तत्वादनेन स्त्रीत्वं भवति । अन्तशब्दग्रहणादनाम्नोऽपि दीर्घान्तस्य स्त्रीत्वं भवति—व्यावक्रोशी व्यावहारी व्यावचर्ची[5] वर्त्तते । **"कर्मव्यतिहारे णच् स्त्रियाम्"** (३।३।४३) इति णच् । **"णचः स्त्रियामञ्"** (५।४।१४) इति तदन्तस्य **"टिड्ढाणञ्०"** (४।१।१५) इति ङीप् । गोत्रा गोत्रसमूहः, रथकट्या, खलिनी । **"इनित्रकट्यचश्च"** (४।२।५१) इति समूहे प्रत्ययाः । अनुदितोऽपि—दया करुणा, लोला विलासः, माला स्रक्, इयं नौर्द्रोणी । द्यौः द्यावौ द्यावः इति गगनार्थो द्योशब्दो विद्यते । प्रागिति किम् ? कीलालपाः ग्रामणीः, यवलूः पुरुष इत्यादौ नित्यं स्त्रीत्वं माभूत् । अत्र हि वाच्यवदनेकलिङ्गार्थो भव[ती]ति वक्ष्यति । तत्परं लक्षणमनेन न बाध्यते । अनुक्त इह द्रुहलिल्लिदन्त । इहास्मिन् लिङ्गानुशासने यः न उक्तः अन्यलिङ्गः स द्रुशब्दान्तः हलन्तः इदन्तः लित्प्रत्यान्तशब्दः स्त्रीलिङ्गो भवति । इयं दद्रुः त्वग्दोषः, शतद्रुः नदी । अनुक्त इति किम् ? हरिद्रुः तरुः, सितद्रुः अब्धिः, शतद्रुः नदः । हलन्तः—इयं त्विट् दीप्तिः, विप्रुट् शीकरः, समित् इध्म, वीरुत् गुल्मम् । इदन्तः—रुचिः तेजः, धूलिः पांसुः, दर्विः पाकघट्टनी, वेदिः यागार्थं भूमिरचनाविशेषः, अहन्तिर्दानम् । लित्—तल्-प्रत्ययान्तः—ग्रामता, जनता ।

---

१. द्र०—कारिका १६ व्याख्या । २. द्र०—कारिका ४ व्याख्या ।
३. द्र०—कारिका ४ व्याख्या—प्रसवग्रहणात् कुसुमस्य यन्नाम ।
४. द्र०—कारिका ४ व्याख्या ।
५. बड़ोदासंस्करणे 'व्याववर्ची' इत्यपपाठः । द्र०—काशिका ३।३।४४॥

अनुक्त इति किम् ? अनड्वान् विपश्चित् सुकृत् कविः मुनिः हरिः गिरिः । अन्तशब्दग्रहणादियं भक्तिः कृतिः लब्धिः सिद्धिरित्यादि । प्राङ्ग्रहणनिवृत्त्यर्थमिह ग्रहणम् । तेन परत्रापि यन्नोक्तमन्यलिङ्गं तत् स्त्रीलिङ्गं भवति । अन्यथा अनेकलिङ्गार्थस्य स्त्रीत्वं प्राप्नोति।दीधितिः रश्मिः, जातिः कुसुमविशेषः, इयमाजिः रणम्, इयं दरत् हृदयम्, इयं द्यौः स्वर्गः गगनं च, इयं विट् पुरीषम्, इयं छर्दिः वान्तिः, छर्दिः······ भवति । वैश्यार्थस्तु पुँल्लिङ्ग एव—अयं विट् वैश्यः ।

भाद्वाःपूरुडुकाकुप्रियङ्गुहृत्स्नायुरज्जुचञ्चुतनुः ।
बह्वश्च समासिकतावर्षाप्सुमनोजलौकसोऽप्सरसः ॥२३॥

एते भासादयः शब्दाः स्त्रीलिङ्गा भवन्ति—इयं भाः कान्तिः, इयं द्वाः द्वारम्, इयं पूः पुरम्, इयमुडुः भम् । द्वार्पुरुडुशब्दानां नपुंसकत्वं[1] प्राप्तम् । इयं काकुः उच्चारणविशेषः । हृद् हृदयं,स्नायुः शरीरान्तर्वन्धः, रज्जुर्बन्धनद्रव्यं, चञ्चुः पक्षिणां तुण्डं, तनुः शरीरम् । उकारान्तत्वात्पुंस्त्वं[2] प्राप्तम् । बह्वश्च—इमाः समाः वर्षम्, इमाः सिकता[3] वालुका, वर्षा ऋतुविशेषः, इमा आपः जलं, सुमनसो देवाः । बह्वः इति किम् ? सुमनः पुष्पम् । जलौकसः रक्ताकर्षप्राणी । अप्सरसः देवयोषित् । पृथगुपन्यासात् इयमप्सरा इत्येकवचनमपि ।

इति स्त्रीलिङ्गाधिकारः समाप्तः ॥

—:०:—

विषकुलिशकलत्राणि त्रिविष्टपाभ्रे नपुंसके पर्व ।
प्रसवाश्ववडववाकच्छदगरुदुच्चारवेधसः पुंसि ॥२४॥

एते विषादयः पुँल्लिङ्गा[4] भवन्ति—[इदं विषम्,] कुलिशं वज्रम्, इदं कलत्रं भार्या, त्रिविष्टपं स्वर्गः, अभ्रं मेघः । इदं पर्व । नान्तत्वात् पुंस्त्वं[5] प्राप्तम् । प्रसवः कुसुमम्, इमौ अश्ववडवौ, इमे अश्ववडवाः,

---

१. द्र०—कारिका ३। २. द्र०—कारिका १५ ।

३. बहुत्वं प्रायिकम् । द्र०—महाभाष्यम्—'एका च सिकता तैलदाने न समर्था ।' अ० १, पा० १, आ० २।

४. अत्र पाठो भ्रष्टः प्रतिभाति । अस्मन्मते 'एते विषादयो नपुंसकलिङ्गाः, प्रसवादयश्च पुंल्लिङ्गा भवन्ति' इत्येवं पाठेन भाव्यम् ।

५. द्र०—कारिका १५।

अश्वाश्च वडवाश्चेति द्वन्द्वे कृते परवल्लिङ्गप्राप्तिः भवति। अनुक्रान्तो वाकोऽनयाऽनेन वा नपुंसके·······वा अनुवाकः इत्यत्र "अकर्त्तरि च कारके सञ्ज्ञायाम्" (३। ३। १९) इति नपुंसके घञ् कुर्वन्ति । तदुभयथा ·· ··अयं छदः पर्णम्, अयं गरुत् पिच्छम्, अयमुच्चारः पुरीषं, "मातुरुच्चार एव सः[1]" इति यथा···– प्तम् ।

विंशत्याद्येकार्था स्त्रियां तु नित्यं नपुंसकेऽदन्ता ।
सङ्ख्या शतादिरिष्टा द्वित्वाद्यर्थे च सङ्ख्यायाम् ॥२५॥

विंशत्याद्या सङ्ख्या एकार्था भवति एकवचनान्ता प्रयुज्यते । सङ्ख्येये·····यां च वर्तमाना । विंशत्या पुरुषैः कुटुम्बैर्वा । एवं त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः । अदन्ता शतादिसङ्ख्या नित्यं नपुंसके भवति। शतं पुरुषाः शतं स्त्रियः शतं कुलानि । एवं सहस्रम् अयुतं नियुतम् । अदन्तेति किम् ? इयं लक्षा, इयं कोटी, अयं शङ्कुः[2] सङ्ख्या । इष्टेतिग्रहणं छन्दःपूरणार्थम् । द्वित्वाद्यर्थे च सङ्ख्यायाम् । विंशत्याद्या शताद्या च सङ्ख्या सङ्ख्यायां वर्त्तमाना द्वित्वाद्यर्थे भवति । च शब्दादेकार्था च भवति । पुरुषाणां विंशतिः द्वे विंशती तिस्रो विंशतयः । पुरुषाणां शतं द्वे शते त्रीणि शतानि, एवमादि ।

स्त्रीलिङ्गनपुंसकयोरानन्तोत्तरपदो द्विगुश्चार्चिः ।
षष्ठ्यादिपदाच्छायायासेनासुराः सनिशाः ॥२६॥

आकारान्तमनन्तं चोत्तरपदं यस्मिन् द्विगौ स तथोक्तो द्विगुः समासः स्त्रीलिङ्गे नपुंसके च भवति । पञ्चखट्वाः समाहृताः पञ्चखट्वी पञ्चखट्वम् । "ह्रस्वो नपुंसके०" (१। २ । ४७) इति ह्रस्वः । दशमाली दशमालम् । अनन्तोत्तरपदः—पञ्चतक्षी पञ्चतक्षम् । अत्र वक्तव्यादेव[3] नकारलोपः —"अनो नलोपश्च[4]" । शतराजी शतराजम्। अर्च्चिश्च स्त्रीनपुंसकयोर्भवति—इयमर्चिः इदमर्चिः।

---

१. अनुपलब्धमूलम् । बड़ौदा-संस्करण-संस्कर्त्रा महाभारत ५।४५।१६ (पूना सं०) संकेतो दत्तः ।

२. शङ्कुः—दशलक्षकोटिसंख्योच्यते (द्र०—शब्दकल्पद्रुम कोशः)।

३. वक्तव्याद् वार्तिकादित्यर्थः ।

४. अनो नलोपश्च, वा च द्विगुः स्त्रियाम् । वार्तिक २।४।१७॥

षष्ठ्यादिपदाच्छाया। षष्ठ्यन्तं पूर्वपदं यस्याश्छायायाः सा स्त्रीलिङ्गे नपुंसके च भवति– वृक्षस्य छाया वृक्षच्छायं वृक्षच्छाया, पर्वतच्छाया पर्वतच्छायम्। पक्षे नपुंसकत्वं विधीयते। तथा षष्ठ्यादिपदाः शालासेनासुरानिशाशब्दाः स्त्रीलिङ्गनपुंसकयोर्भवन्ति—गोशाला गोशालं,क्षत्रियसेना क्षत्रियसेनं,यवसुरा यवसुरं,भूतनिशा भूतनिशम्।

पुँल्लिङ्गस्त्रीलिङ्गा मरीचिमणियष्टिमुष्टियोन्याणिः।
त्रुटिमषिपाटलिशाल्मलितरणिश्रोण्यूर्मयो बस्तिः ॥२७॥

एते मरीच्यादयः शब्दाः पुँल्लिङ्गाः स्त्रीलिङ्गाश्च भवन्ति—अयं मरीचिः इयं मरीचिः रश्मिः, अयं मणिः इयं मणिः माणिक्यम्, अयं यष्टिः इयं यष्टिः अवष्टम्भनदण्डः,इयं मुष्टिः अयं मुष्टिः अंगुलिसङ्कोचः, अयं योनिः इयं योनिः प्रसिद्ध एव, अयमाणिः [इयमाणिः] शकटकीलिका, अयं त्रुटिः इयं त्रुटिः काललेशः, अयं मषिः इयं मषिः। एवं पाटलिः, शाल्मलिः, तरणिः, श्रोणिः नितम्बः, ऊर्मिः, बस्तिः।

अरणीषुधीषुतिथयः समृत्यु कर्कन्धुबाहुकण्डु तथा।
संज्ञा बहुलं वाच्यवदशरन्नित्यं ह्यनेकलिङ्गार्थः ॥२८॥

अरण्यादयः शब्दाः पुँल्लिङ्गस्त्रीलिङ्गा भवन्ति—अरणिः अग्निमन्थनकाष्ठम्। एवमिषुधिः भस्त्रा। क्यन्तत्वात्पुंस्त्वं[1] प्राप्तम्। इषुः शरः। तिथिः प्रतिपदादिषु। कर्कन्धुबाहुकण्डूशब्दाः सह मृत्युशब्देनोभयलिङ्गा भवन्ति—अयं कर्कन्धुः बदरीकं दुःपाकस्थानं, बाहुर्भुजः, कण्डुर्गात्रघर्षणे। वाच्यवत्। वाच्यमभिधेयं यल्लिङ्गं संज्ञायाः तेन तुल्यं संज्ञाशब्दो बहुलं भवति। शरयुः…. ..। श्रीकण्ठो नाम देशः, मालवको नाम देशः, मथुरा नाम नगरी, कान्यकुब्जं नाम नगरम्।… शार्दुलविक्रीडितम्,उपचित्रकम्, पदचतुरूद्‌र्ध्वं[2] नाम वृत्तम्। केषांचित् न भवति—वरेन्द्राः तीरभुक्तिर्नाम देशः। कौङ्कणं कश्मीरं नाम देशः। शालुकिनी लिङ्गाषाढी नाम ग्रामः। तैलावटं श्रीभवनं नाम ग्रामः। मालिनी स्रग्धरा आपीडः पणव इति नाम वृत्तम्। क्वचिद्वचन-

---

१. द्र०—कारिका १५।

२. द्र०—हैमछन्दोऽनुशासनम् ३।४। 'पदचतुरुर्द्ध्वं' इति बड़ौदासंस्करणेऽपपाठः।

व्यत्ययः–गोदौ नाम ह्रदौ तयोरदूरभवो ग्रामः गोदौ ग्रामः। पञ्चाला नाम देशः। खलतिकं नाम वनानि, खलतिकस्य पर्वतस्यादूरभवानि। क्वचिल्लिङ्गवचनव्यत्ययः—वरणानामदूरभवं नगरं वरणाः नगरम्। अशरन्नित्यं ह्यनेकलिङ्गार्थः। न एकमनेकं लिङ्गमर्थोऽभिधेयं यस्य शब्दस्य स वाच्यवद्भवति, नित्यं शरदं वर्जयित्वा—क्षीरं पिबतीति क्षीरपाः स्त्री ना कुलं वा,एवं ग्रामणीः यवलूः। अयं काष्ठभित् कुठारः, इयं काष्ठभित् वासी, इदं काष्ठभित् करपत्रम्। आत्मंभरिः पुरुषः, आत्मंभरिः स्त्री कुटुम्बं वा, दाक्षिः पुमान् स्त्री कुलं वा। श्रीमान् पुमान्, श्रीमती स्त्री, श्रीमत् कुलम्, धर्ममनाः पुमान् स्त्री कुलं वा, शुद्धमतिः ना स्त्री कुलं वा, स ना, सा स्त्री, तत् कुलम्। द्वौ नरौ, द्वे स्त्रियौ, द्वे कुले। श्वेतः पटः, श्वेता पटी, श्वेतं वस्त्रम्। अयं सिन्धुः अब्धिः, इयं सिन्धुः[नदी], अयं गौ रश्मिः, इयं गौः भूमिः। अयं किष्कुः इयं किष्कुः वितस्तिः हस्तः, अयं करेणुः हस्ती हस्तिनी वा। शरदिति किम्? इयं शरत् ऋतुविशेषः वर्षं च। हलन्तत्वात्[1] स्त्रीलिङ्गमेव भवति। नित्यग्रहण बहुलनिवृत्त्यर्थम्।

स्वत आमलकविभीतकतटभल्लातकहरीतकास्त्रिषु ति (हि)।
ङ्यन्ताः स्त्रियामथान्ताः शृङ्खलमविषाणनखरवल्लूराः ॥२९॥

एते आमलकादयः शब्दाः स्वत एव, नाभिधेयवशात् त्रिष्वपि लिङ्गेषु भवन्ति। स्त्रियां ङीप्प्रत्ययान्ता भवन्ति। आमलकः आमलकी आमलकं, बिभीतकः बिभीतकी बिभीतकं, तटः तटी तटं, भल्लातकः भल्लातकी भल्लातकं, हरीतकः हरीतकी हरीतकम्। शृङ्खलादयः शब्दाः स्त्रियामथान्ताः आकारान्ता भवन्ति। शृङ्खलः शृङ्खला शृङ्खलं, विषाणः विषाणा विषाणं, नखरः नखरा नखरं, वल्लूरः वल्लूरा वल्लूरम्।

परवल्लिङ्गं द्वन्द्वे तत्पुरुषे च द्विगौ हि वाच्यमिव।
अर्थान्ते च प्राद्यलमापन्नप्राप्तपूर्वे च ॥३०॥

द्वन्द्वे समासे यत् परपदे लिङ्गं, समासेऽपि तद्भवति– इमौ

---

1. द्र०—कारिका २२।

मयूरीकुक्कुटौ, इमे कुक्कुटमयूर्यौ, इमे न्यग्रोधशिंशपे, इमौ शिंशपान्यग्रोधौ। तत्पुरुषे च, यत् परपदे लिङ्गं तद्वत् समासेऽपि लिङ्गं भवति—अर्धं पिप्पल्याः अर्धपिप्पली, अर्धहरीतकी, राजपुरुषः, राजदारिका, नीलोत्पलम्। द्विगौ हि वाच्यमिव। द्विगौ हि समासे वाच्यमिव लिङ्गं भवति। असमाहारार्थ आरम्भः—पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः, दशकपालः। परवल्लिङ्गत्वं प्राप्तम्। अत्र अर्थान्ते च तत्पुरुषे वाच्यमिव लिङ्गं भवति—ब्राह्मणार्थ ओदनः, ब्राह्मणार्था शिखरिणी, ब्राह्मणार्थं पक्वान्नमिति। प्रादि-अलम्-आपन्न-प्राप्त-पूर्वे च तत्पुरुषे वाच्यमिव लिङ्गं भवति—निर्गतः कौशाम्ब्याः निःकौशाम्बिः, निःखट्वः, अतिनु काष्ठम्। परवल्लिङ्गं प्राप्तम्। अलं जीविकायै अलंजीविकः पुरुषः, आपन्नो जीविकाम् आपन्नजीविकः, एवं प्राप्तजीविकः।

दृश्यन्तेऽर्धर्चाद्या नपि पुंसि च शङ्खपद्ममम्भोजे।
भूतो ग्रहेऽथ लवणे सैन्धवमित्यनुदितं जनाज्ज्ञेयम्॥३१॥

अर्धर्चप्रभृतयः शब्दाः नपि पुंसि च दृश्यन्ते—इदमर्धर्चम्, अर्धर्चः। अर्धमृच इति विगृह्य "ऋक्पूरब्धूःपथामानक्षे" (५।४।७४) अप्रत्यये कृते परवल्लिङ्गत्वं प्राप्तम्। एवं गोमयः कषायः कार्षापणः कुतपः कपाटं गृहः वज्रः अन्धकार इत्यादयः। दृशिग्रहणं प्रयोगानुस्मरणार्थम्। शङ्खपद्ममम्भोजे। शङ्खपद्मशब्दौ अम्भोजे जलजे वाच्ये नपुंसके पुंसि च भवतः—इदं शङ्खम्, अयं शङ्खः। इदं पद्मम्, अयं पद्मः। अम्भोज इति किम्? अयं शङ्खः, अयं पद्मः निधिः। भूतो ग्रहे। भूतशब्दः ग्रहे पिशाचे वाच्ये उभयलिङ्गो भवति—इदं भूतम्, अयं भूतः पिशाचः। ग्रह इति किम्? एतानि भूतानि पृथिव्यादीनि। भूतः पुरुषः, भूता स्त्री, भूतं कुलम्। अथ लवणे सैन्धवम्। लवणेऽभिधेये सैन्धवमित्येतन्नाम उभयलिङ्गं भवति—इदं सैन्धवम्, अयं सैन्धवः लवणम्। लवण इति किम्? सैन्धवः अश्वः, सैन्धवी स्त्री, सिन्धौ भवमिति विग्रहः। नित्यं पुंल्लिङ्गानां यो

नपुंसके प्रयोगो दृश्यते,यश्च नित्यं नपुंसकानां पुँल्लिङ्गे प्रयोगो दृश्यते, स अर्धर्चादित्वाद् द्रष्टव्यः। इत्यनेन प्रकारेण यन्मया न उदितं न कथितं तज्जनाद्विशिष्टलोकाज्ज्ञेयमवगन्तव्यमिति[1]।

व्याडिप्रणीतमथ वाररुचं सचान्द्रं
जैनेन्द्रलक्षणगतं विविधं तथाऽन्यत्।
लिङ्गस्य लक्ष्म हि समस्य विशेषयुक्तम्
उक्तं मया परिमितं त्रिदशा[2] इहार्याः ॥३२॥

अव्यापि संशयि गतार्थमनिष्टसङ्गि
लिङ्गानुशासनमिहाज्ञतया मया यत्।
प्रोक्तं हि किञ्चिदविचार्य तदार्यवर्यैः
संस्कार्यमस्ति यदि कार्यमुतावधीर्यम् ॥३३॥

लिङ्गानुशासनमिदं कृतमुन्नतेन
शुभ्रैर्गुणैः कविहितं भुवि वामनेन।
बुद्ध्वाऽखिलं विमलशब्दगतप्रमेयं
नातः परं शुभतरं स्फुटितमस्ति लोके ॥३४॥

इति लिङ्गानुशासनवृत्तिः समाप्ता ॥

संवत् १२७३ श्रावण वदि ८ रवौ लिङ्गवृत्तिपुस्तिका लिखितेति ॥

—:o:—

---

१. अत एवासकृत् स्मर्यते वैयाकरणैः—लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य।

२. त्रिदशास्वार्यासु लिङ्गमुक्तमित्यर्थः। अवशिष्टासु प्रथमा मङ्गलाचरणरूपा अन्याश्चोपसंहारपराः।

प्रथमं परिशिष्टम्

लिङ्गानुशासनीय-कारिकाणाम् अनुक्रमणिका

द्वितीयं परिशिष्टम्

स्वोपज्ञवृत्तावुद्धृतानां विशिष्टानां संज्ञाशब्दानाम् अनुक्रमणिका

---

1. अत्र क्रमशः पृष्ठस्य पङ्क्तेश्च संख्या ज्ञेया।

तृतीयं परिशिष्टम्

स्त्रोपज्ञवृत्तावुद्धृतानां वचनानाम् अनुक्रमणिका

चतुर्थं परिशिष्टम्

लिङ्गानुशासने संकेतितानां साक्षाद्वा निर्दिष्टानाम्
तद्वृत्तौ चोदाहरणरूपेणोद्धृतानाम्
शब्दानाम् अनुक्रमणिका

संकेता:—न. नपुंसकलिङ्ग | त्रि. त्रिलिङ्ग
स्त्री. स्त्रीलिङ्ग | वा. वाच्यलिङ्ग
पु. पुँल्लिङ्ग | क्रिवि. क्रियाविशेषण
पुन. पुँल्लिङ्गनपुंसकलिङ्ग | अवि. अव्ययविशेषण
पुस्त्री. पुँल्लिङ्गस्त्रीलिङ्ग | स्त्रीन. स्त्रीलिङ्गनपुंसकलिङ्ग

शब्द	लिङ्ग	पृष्ठ	पंक्ति	शब्द	लिङ्ग	पृष्ठ	पंक्ति
वायु-विशेषनाम	पु	१६	६	वेमन्	पु	१७	१३
वारिक	न	८	४	वेश्म	न	६	१४
वालधि	पु	१५	८	वैर	,,	१३	९
वास्तु	न	५	१०	व्यञ्जन-जातिनाम	,,	७	२४
विंशति	स्त्री	२१	९	व्यान	पु	१६	६
विट्	,,	२०	६	व्यावक्रोशी	स्त्री	१९	१३
विड	न	७	२६	व्यावचर्ची	,,	१९	१४
वितान	पु	१५	२०	व्यावहारी	,,	,,	,,
वित्त	न	५	७	व्रत	न	५	५
विधि	पु	१५	७	व्रात	पु	१७	६
विपथ	न	१०	५	व्रीहि	,,	१६	१३
विपश्चित्	पु	१६	९	शकृत्	न	७	१६
विपिन	न	५	७	शङ्ख (जलज)	पुन	२४	२०
विप्रुष्	स्त्री	१९	२५	शत	न	२१	११
विभव	पु	१७	२२	शतकोटि	पु	१५	१२
वियत्	न	७	१२	शतद्रु	स्त्री	१९	२४
विलेय-जातिनाम	,,	,,	२१	शत्रु	पु	१६	१०
विवर	,,	,,	१०	शतैगंङ्ग	न	९	७
विश् (पुरीषार्थक)	स्त्री	२०	६	शमी	स्त्री	१९	९
विश (वैश्यार्थक)	पु	,,	७	शमनीय	न	१०	२३
विशः (पुरीष) नाम	न	७	१६	शमितव्य	,,	१०	२२
विश्न	पु	११	४	शरण	,,	१२	१९
विष	न	२०	२१	शरत्	स्त्री	२३	१४
विष-नाम	पु	१६	१	शरयु	वा	२२	२१
विषाण	त्रि	२३	२३	शराव	न	१३	११
विहायस्	न	७	१२	शरीर	न	६	२२
वीरुत्	स्त्री	१९	२५	शर्म	,,	५	१९
वृक्ष	पु	१५	२६	,,	,,	७	१५
वृक्षच्छाय	न	२२	२	शलभच्छाय	,,	८	१९
वृक्षच्छाया	स्त्री	,,	,,	शशहरिण	,,	९	५
वृत्त	न	५	६	शशोर्ण	,,	१४	१
वृन्द	,,	१२	२१	शार्दूलविक्रीडित	वा	२२	२३
वेदि	स्त्री	१९	२६	शालि	पु	१६	१३

शब्द	लिङ्ग	पृष्ठ	पंक्ति	शब्द	लिङ्ग	पृष्ठ	पंक्ति
सस्य	न	६	५	स्थातव्य	न	१०	१३
सहस्र	,,	२१	१२	स्थेय	,,	,,	,,
सांराविण	,,	१०	१८	स्नायु	स्त्री	२०	१२
साध्वस	,,	७	१३	स्यन्दन	पु	१५	१९
सान्द्राविण	,,	१०	१८	स्रग्धरा	स्त्री	२२	२६
सामन्	,,	५	,,	स्वः	पु	१७	२१
सार (न्यायादनपेते	,,	१२	२	स्वप्न	,,	११	५
साहस	,,	१३	६	स्वरित	,,	१५	२५
सिकता	स्त्री	२०	१५	स्वर्ग	,,	,,	११
सिक्थ	न	७	२२	स्वसृ	स्त्री	१९	५
सिद्ध	,,	१०	१७	स्वान्त	न	६	२०
सिद्धि	स्त्री	२०	२	स्वापतेय	,,	,,	१७
सिध्म	न	१३	३	ह-अन्त	,,	,,	९
सिध्य	पु	१५	२१	हरण	,,	१०	१७
सिन्धु	वा	२३	१२	हरित	पु	१६	४
सीसक	न	७	२३	हरीतक	त्रि	२३	२१
सुख	,,	,,	१५	हल्-अन्त	स्त्री	१९	२३
सुख नाम	,,	,,	,,	हल्पूर्व-य-अन्त	न	६	३
सुत	पु	१६	१०	हल्पूर्व-र-अन्त	,,	,,	,,
सुदिनाह	न	१३	१७	हल्पूर्व-रु-अन्त	,,	,,	,,
सुमनस्	स्त्री	२०	१५	हसित	,,	१०	१७
सुवर्ण	न	७	२४	हस्त्यश्व	,,	९	५
सुहृत्	पु	१६	९	हायन	पु	१७	१२
सेतु	,,	१४	१९	हार	,,	,,	२२
सैन्धव	वा	२४	२७	हालाहल	,,	१६	१
सैन्धव (लवणे)	पुन	,,	२५	हाहाहूहू	,,	१७	६
सौशमि कन्थ	न	९	२४	हिम	न	७	१०
स्तन	पु	१७	११	हिम-नाम	,,	,,	,,
स्तु-अन्त	न	५	३	हृत्	,,	६	२०
				,,	स्त्री	२०	१२
स्तेय	,,	११	१५	हृदय	न	६	१९
स्त्री	स्त्री	१९	७				
				हृदय-नाम	,,	,,	,,
स्त्रीसभ	न	८	२३	हृषीक	,,	७	१२

रामलाल कपूर ट्रस्ट

शिक्षा-निरुक्त-व्याकरण विषयक विशिष्ट प्रकाशन

१. वर्णोच्चारण शिक्षा—ऋषि दयानन्द कृत हिन्दी व्याख्या । ०-५०

२. शिक्षासूत्राणि—आपिशलि-पाणिनि-चन्द्रगोमी प्रोक्त । १-५०

३. शिक्षाशास्त्रम्—(संस्कृत) जगदीशाचार्य । ५-००

४. अरबी-शिक्षाशास्त्रम्— ,, ५-००

५. निरुक्त-समुच्चयः—आचार्य वररुचिकृत। सम्पा० यु० मी० । ६-००

६. अष्टाध्यायी (मूल) शुद्ध संस्करण। मूल्य २-००

७. धातुपाठ—धात्वादिसूचीसहित, सुन्दर शुद्ध संस्करण। मूल्य २-००

८. संस्कृत-धातुकोष—यु० मी० । नया संस्करण यन्त्रस्थ

९. वामनीयं लिङ्गानुशासनम्—स्वोपज्ञ-वृत्ति सहितम् । मूल्य ५-००

१०. अष्टाध्यायी-परिशिष्ट—पाणिनीय सूत्रपाठ के विविध पाठभेद तथा सूत्र-सूची सहित । २-५०

११. अष्टाध्यायी-भाष्य—श्री पं० ब्रह्मदत्त जिज्ञासुकृत । प्रथम भाग २४-००, द्वितीय भाग १६-००, तृतीय भाग २०-०० । पूरा सैट ६०-०० ।

१२. संस्कृत पठन-पाठन की अनुभूत सरलतम विधि—लेखक—श्री पं० ब्रह्मदत्त जिज्ञासु । प्रथम भाग ७-००, द्वितीय भाग ८-००

१३. महाभाष्य—हिन्दी व्याख्या, यु०मी० । प्रथम भाग छप रहा है । द्विती[य] भाग २५-००, तृतीय भाग २५-०० ।

१४. उणादिकोष—ऋ० द० स० कृत व्याख्या, तथा पं० यु० मी० कृत टिप्पणियों, एवं ११ सूचियों सहित । अजिल्द ७-००, सजिल्द १०-०० ।

१५. दैवम्—पुरुषकारवार्तिकोपेतम्—लीलाशुकमुनि कृत । ८-००

१६. लिट् और लुङ् लकार की रूप-बोधक सरलविधि २-००

१७. भागवृत्तिसंकलनम्—अष्टाध्यायी की प्राचीन वृत्ति ३-००

१८. काशकृत्स्न-धातु-व्याख्यानम्—संस्कृत रूपान्तर । यु०मी० ८-००

१९. काशकृत्स्न व्याकरणम्—संपादक—यु० मी० ३-००

२०. शब्दरूपावली—बिना रटे सरलता से शब्दरूपों का ज्ञान करानेवाली अद्भुत पुस्तक । मूल्य २-००

प्राप्ति-स्थान

रामलाल कपूर ट्रस्ट, बहालगढ़, जिला-सोनीपत (हरयाणा)

१३१०२१